महादेववेदान्तिकृत भवानन्दीप्रकाशः 2/6 Bhavanandi prakash.

भ॰प्र॰ सामानाधिकरण्येनेत्यन्यथा भूतलवृत्तित्वं घटवृत्तीत्यादिप्रयोगो न स्यात् भूतलवृत्तित्वतावच्छिन्नस्य घटादाववृत्तित्वादिति भावः तेन समानीत्याहस्वलक्ष्यसुस्तिभेदेन वृत्ति
त्वसामान्ये-साधारणवृत्तित्वं साधनवृत्तित्वेति भावविशिष्टसाधनवृत्तिता च यत्साध्यसंभवेपि कृतार्थ इति तथा च वृत्तस्तिभेदेनान्वयभेदस्य साध्यसंभवान्न दोष इति भावः शेषं पू
र्ववदिति सारं केचित्तु दीधितौ वृत्तित्व सामान्यमिति पाठं वदंति तेन कृदास्य प्रत्याह तद्वृत्तित्वेत्यादि तत्सामान्यपदं नोपात्तमिति दीधितिकृते त्यादिः तथा च तादृशपाठो न संभवतीति भा
वः द्रव्यत्वपदस्येंधनत्वोपलक्षकत्वे द्रव्यत्वादिनेत्यस्मात् तदुगामे विज्ञानबहुव्रीहिगोधनत्वपरत्वे वा संयोगेन हेतुतायामप्यप्रसिद्धेरसंभवादाह यथाश्रुतमिति अप्रसिद्ध
त्य इति आर्द्रेंधनादौ लक्षणसमवायहेतुतावच्छेदकसंबंधेन वृत्तित्वस्यैव विवक्षणीयत्वादिति भावः दीधितौ संगतिरिति तथा च सध्यसाधनभेदेनोपाधिलक्षणे दान
सुदृसाध्यव्यापकेयत्किंचित्सदं न देयं अवच्छिन्नसाध्यव्यापकेनुतन्निवेशनीयमन्यथा काकत्वादिसाधारणशाकपाकजत्वाभाववद्वृत्तित्वस्य श्यामत्वव्यभिचाराव्या
प्यत्वेन लक्षणागमनासंभवादिति भावः व्याख्यातं धिशेषितमिति अवच्छिन्नसाध्यव्यापकोपाधिसंग्रहाय तत्र केवलशाकपाकजत्वादिव्यभिचारस्य काकत्वादौ व्यभिचारेणासाध्य
भिचाराव्याप्यत्वेपि सत्ताभिन्नानयत्वश्यामभिन्नानतयत्वमात्रविशेष्यकधीविशेष्यत्वादिसहितस्य साध्यव्यभिचाराव्याप्यत्वादिति भावः अविशेषितमिति पुद्रसाध्यव्या
पकसंग्रहाय सामान्यगर्भतायामिति अनुसत्तिवललस्पत्वान्न स्यादिति भावः दृष्टांतार्थमिति अत्र व्याप्तिपक्षधर्मतारूपयोग्यताया एव निवेशेन दृष्टांतप्रदर्शनमनुपयु १५०
क्तमिति नाशंक्यं योग्यतासहितफलोपधानविवक्षणेपि नैतद्वारणाभिमाशयेन तदुपदर्शनात् स्वरूपसिद्धयर्थं हेतोः पक्षधर्मतार्थं न च तथापि द्रव्यत्वविशेषणस्यासिद्धिवा

व्याप्यादिपदार्थान्वयः अन्यथा तादृशान्वयस्य व्युत्पत्तिविरुद्धत्वात् वृत्तित्वादिपदेति वृत्तित्वादिबोधकत्वस्यापि पदेऽस्यार्थः प्रकृते साधनवृत्तित्वे च तत्र सवृत्तिपदं बोध्यं
आधेयतावच्छेदकेति तादृशवृत्तित्वस्यार्थः सामानाधिकरण्येनेति अन्वयो व्युत्पत्तिविरुद्धत्वान्न अत इत्यनुषङ्गेणान्वयः वृत्तित्वोऽभावपीति कैमुतिकन्यायेनेदं ते
न प्रकृते तादृशोक्त्यभावेऽपि न क्षतिरिति वृत्तिः वस्तुतस्तु स्वोक्तपूर्वानुसारेणैवेदं मतं न दोषः तदाशयेनेति आधेयतावच्छेदकाश्रयेत्यर्थः तत्सत्त्वेनैव साधवृत्तित्वसत्त्वेनैव
कृतार्थ इति वृत्तित्वादिपदसमभिव्याहारे इति विभक्तिविपरिणामेनानुषङ्गान्वयः तेन नानन्वयः तथा चोक्तव्युत्पत्त्यनुसारेण व्याप्यत्वान्वय एव वैयधिकसामान्यपदोपा
दानं ननु साधनवृत्तित्वान्वय इति नासंभव इति भावः वस्तुतस्तु ननु वृत्तित्वे संबंधविशेषानिवेशे वस्समानादिशासंबंधांतरमादायासंभवः किं चाभवृत्तित्वे इतरपदार्थान्वयो
वृत्तित्वसामानाधिकरण्येन वृत्तित्वावच्छेदेन वा आधेयत्वस्य मानाभावात् दिशारूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावादावतिव्याप्तिः अथैतादृशवृत्तित्वावच्छिन्नस्य साधनवृ
त्तित्वाभावादसंभव इत्यत आह वृत्तित्वमित्यादि वृत्तित्वसामान्यं सामान्यतो वृत्तित्वं सामानाधिकरण्यावच्छिन्नत्वोभयसाधारणमिति यावत् सामान्यपदोपादानाच्चेति साधा
रण्येन वृत्तित्वनिवेशाच्चेत्यर्थः नातिव्याप्तिरिति तथा च तादृशवृत्तित्वावच्छिन्नस्य साध्यव्यभिचारव्याप्यत्वनिवेशान्न दोष इति भावः तदव्याप्यत्वादितीति इदमुपलक्ष
णं तादृशवृत्तित्वावच्छिन्नस्य साधनवृत्तित्वाभावेऽपि तादृशवृत्तित्वसामानाधिकरण्येन साधनवृत्तित्वनिवेशे न तादृशवृत्तित्वाश्रयव्यक्तिविशेषस्य साधनवृत्तित्वान्ना
संभव इत्यपि द्रष्टव्यं ननु साधारण्येन वृत्तित्वनिवेशेऽपि व्याप्यत्वान्वयेऽवच्छिन्नत्वस्य साधनवृत्तित्वान्वये च सामानाधिकरण्यस्य कथं लाभ इत्यत आह व्याप्यत्वादिपदेति

रकतयावैयर्थ्यमेवेतिवाच्यं सत्ताद्रव्यत्वजलत्वमात्रविशेष्यकेसमस्तैतत्त्रितयप्रमित्याविशेष्यकेसार्थकत्वेनैतत्त्रितयमितविशेष्यकत्वाभावरूपत्वंगभावघटकतयाधूम
त्वविशेषणस्यवैयर्थ्याभावात् यद्वा एतत्त्रितयमात्रविशेष्यकधीप्रसक्तितद्व्यक्तित्वेनोपादायतद्व्यक्तिविशेष्यत्वविशिष्टपृथिवीत्ववद्वृत्तित्वमेवहेतुःकर्तव्यः द्रव्यत्वादि
कंतुननिविशतेप्रयोजनाभावात् तथाचनोक्तवैयर्थ्यशंकेतिध्येयं धूमप्रागभाववद्वह्निभेदात्रवैयर्थ्यमित्याशयेनाहतद्विशेष्यत्वेसतीति इत्यस्य इत्यस्येवसामर्थ्यम
नुमायकत्वसंभवेवैयर्थ्यादिति जन्यत्वोपादानेतुतत्रैवव्यभिचारवारणायतत्सार्थक्यमितिभावः तन्मात्रेतिसत्तादित्रितयमात्रेत्यर्थः अप्रसिद्धेतिज्ञातिभा
नेधर्मिभानस्यावश्यकत्वादितिभावः गतमितितथाचतत्रव्यभिचारइतिभावः विशेष्यांशेतिविशेष्यतारूपांशइत्यर्थः विशेष्यताचात्रमुख्यविशेष्यता
रूपानिवेश्यअसमर्थोक्तदोषतादवस्थ्यादितिध्येयं विशेष्यंपृथिवीत्ववद्वृत्तित्वंनोपाधीतितथाचात्रपृथिवीत्वाभावेऽतिव्याप्तिर्मिथ्याकिंविद्विशेषितम विशे
षितंवेत्यादिलक्षणांसत्त्वोक्तलक्षणोक्तमितिभावः नोपाधित्वं नोक्तलक्षणतावच्छेदकाक्रांतत्वं दीधितौयथोक्तरूपमितिपक्षधर्मावच्छिन्नाभावाधिकरणीभू
तेत्यादिरूपंचतस्यचमण्यप्रसिद्धयुक्तंवैसाध्यसमानाधिकरणःसदुपाधिः हेतोरेकान्वयेयेषांस्वसाध्यव्यभिचारितेति स्वंचसाध्यंचतयोर्व्यभिचारितेत्यर्थः एकान्वये ए या
काधिकरणमात्रभिन्नहेतावेकान्वयइतिपाठेहेतावित्यस्यव्यभिचारितायामन्वयः तत्रैव तिरूक्तार्थएवकारिकार्थःसचोक्तस्यलेपृथिवीत्वाभावादौनास्तीतिभावः व्याख्यायां
तादृशव्यवहारेतिउपाधिव्यवहारेत्यर्थः आप्यत्वासिद्धउन्नायकत्वस्येतिगौरवेणोसाध्यमित्यनान्वयः आप्यत्वासिद्धुन्नायकत्वादिकमितिदीधितिस्थादियदोपसंग्राह्यमाहमी

प्यत्वासिद्ध्युक्तापकेतियद्धर्मावच्छिन्नाभाववच्छिन्नंकिंचिद्यत्तत्वृत्तित्वविशिष्टवृत्तित्वाभावसाध्यसमतादृशव्याप्यत्वाभावव्याप्यःसाधनवृत्तिश्चतद्धर्मवत्वस्य वेसर्थःकेचित्तु
अत्रपृथिवीत्वाभावादिव्याप्तोपाधिव्यवहारविषयतानवच्छेदकव्यवस्थापनप्रकरणेतादृशरूपांतरस्वंकुनसंभवोविसेनपृथिवीत्वाभावादिसाधारणतादृशरूपांतरस्वं
च्नसामान्योविसेनसंदर्भविरोधोस्वरसोऽदृष्टव्यःदीधितौनदोषायेति तत्रशक्योपाधिव्यवहारस्यसंदिग्धतयोपाधित्वानभ्युपगमादितिभावःव्याख्यायांलाघवस्येति सं
दिग्धव्यवहारमतिक्रमोसादिःपृथिवीत्वाभावसंग्रहायाहविशेषितेनेति दीधितौसाध्याभावसाधनोभयाधिकरणेतिसाध्याभाववत्साधनाधिकरणेत्यर्थःतेनसर्वत्रसा
ध्याभावसाधनयोरेकसंबंधासंभवेनतदुभयत्वावच्छिन्नाधिकरणत्वनिवेशासंभवेपिनक्षतिःप्रतियोगित्वंप्रतियोगितावच्छेदकधर्मवत्वंतथाचरूढ्युपाधिव्यवहारवि
षयतावच्छेदकमस्त्वित्याख्यायांऽत्रायकत्वेइसप्तम्यर्थोघटकत्वंव्याप्ताघटितं दीधितौसहार्थेतिएकाधिकरणनिरूपितसाहित्येसप्तम्यर्थःअस्यापियद्व्यभिचारित्वेनेत्यादिस्थ
लस्यापिसत्वेति तर्हीसाध्युक्तएवेत्यर्थःसाधनस्येतिषष्ठ्यर्थोधिकरणत्वंसाध्यव्यभिचारयदर्थैकदेशेसाध्याभाववत्सन्निहितंइत्यंचसाधनवतिसाध्याभाववत्वस्योपा
ध्यभाववत्वस्यचलाभेशेषंस्पष्टम्अभिसाशयःव्याख्यायांमूलार्थइतिशेषपरिसायेनमूलार्थइत्यर्थःएतेनसाधनेसाधनेसाध्यव्यभिचारित्वोपाधिव्यभिचारित्वो
भयत्रहेसाध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वयहेत्वुपाधौसंभवतितथाचसाध्याभावसाधनोभयाधिकरणघटितत्वैक्यसाधारणोपिनक्षता रा.म.०
संगतिरितिप्रदर्शितंननुशेषरहितस्यज्ञानेनउपाधिव्यवहारविरहेणगौरवसत्वेपिशेषसंवलितस्यैवतथात्वमुपेयतेइत्याशंक्यतेदीधितौतद्रूपेतिव्याख्यायांतद्रू

पक्षेति।तर्हि साध्यकरूपस्येत्यर्थः। विरुद्धसाधारणत्वात् धूमवान् वह्नेरित्यादौ तत्र ह्रदत्वादिसाधारणत्वात् अव्यभिचारस्य साध्यव्यभिचारस्य अतिस्फुटतयेति तथा चोपाधिना व्य
भिचारोन्नयनं न स्यादुपाधितावज्ञानस्य वसाध्यव्यभिचारज्ञानादिति भावः। हेतुत्वेपि अत्रैव मित्रत्वादिनोक्तेपि तुल्यमित्यर्थ इति तत्रापि विरुद्धसाधारणस्य व्यभिचारस्या
तिस्फुटत्वस्य तुल्यत्वमित्यर्थः। तथा चा पक्षे साध्यकत्वे तर्हि साध्यकत्वे उभयोरेव ज्ञाने पुपाधिव्यवहारविरहेण लाघवस्यात् किं विशिष्टतया। नापक्षासुरुरपि यद्धर्मावच्छिन्नाभावे सा
ध्यादिना पूर्वोपदर्शितधर्मस्योपाधिव्यवहारविषयतावच्छेदकत्वमिति भावः। इत्यादिक्रमेणेति। आदिना वाच्यः प्रमेयः प्रमेयत्वादित्यत्र सत्ताप्रमेयत्वघटत्वमात्रविशेष्यक
धीविशेष्यत्वे सति दुर्दूतरूपव्यभिचारित्वादितिक्रमस्य परिग्रहः। समुचितमेवेति न च कथकानां तादृशधर्मानुसरणनियमे मानाभावेन पृथिवीत्वाभावादेर्वारणमनुचित
मिति वाच्यं एतदाशयेनैवायेरूपादिसाध्यकद्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधिता पक्षेतिमस्यवक्ष्यमाणत्वात् पृथिवीत्वाभाववतुल्यतयेति एकाधिकरणमंतरभाव्य
हेतौ स्वसाध्यव्यभिचाराभावादिति भावः। अधिकरणस्यापि तद्धर्मावच्छिन्नाभावे पलक्षितत्वात् किंचिदधिकरणस्यापि एवमग्रेपि अप्रवेशादिति तथा चोक्तविवक्षणा
संभवेनोक्तातिव्याप्तिर्दुर्वारेति भावः। न च यद्धर्मावच्छिन्नाभावे साध्याभाववसामानाधिकरण्यविशेषणेनोक्तातिव्याप्तिनिरासः खंडकालभेदाभावमहाकालभेदाभावयोर
सामानाधिकरण्यादिति वाच्यं तथापि गगनमहाकालान्यतरभेदवान् घटादित्यत्र गगनमंतर्भाव्य साध्याभावसमानाधिकरणाभावप्रतियोगिनि खंडकालगगनान्यतर
भेदेऽतिव्याप्तेर्दुर्वारत्वात् न च हेतौ मेंदंतर्भाविशेषणोक्तसामानाधिकरण्यविवक्षणान्नोक्तदोष इति वाच्यं तथापि महाकालपलयोरन्यतरभेदवान् घटादित्यत्र पल

मं०प्र०

२

परूपवृत्तिमद्यन्तर्भावेन साध्याभावसमानाधिकरणाभावप्रतियोगित्वं उक्तलक्षणयान्तरभेदेति प्रसंगतादवस्थ्यात् एतेसाध्विक्षमाणरीत्योक्तातिव्याप्तेरसंभवाद

६ हरस्वमिति आधेयतायानिरूपकाधिकरणाभेदाद्वैतैतद्रूपसमवेतत्वैतद्रूपभिन्नसमवेतत्वयोर्नैकत्वमत आह हेतुनिष्ठेति उक्तव्याप्तेस्तादात्म्येनव्याप्तेश्चयोग्यताभावादितिव्या

प्यतावच्छेदकसंबंधेनैव पक्षधर्मताज्ञानस्योपयुक्तत्वोपाधिव्यभिचारस्य तादात्म्येन पक्षावृत्तितया तादात्म्येन व्याप्तेर्व्यभिचारोन्नयनयोग्यतानात्मकत्वादिति भावः इत्थं च

रसादिति केचित्तु द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र गुणकर्मान्यत्वविशिष्टसत्त्वेऽतिव्याप्तिः विशिष्टसत्त्वस्यापि तादृशापक्षिंचिदधिकरणानुरागवृत्तित्वात् आधेयतापात्र

व्याप्तिरुक्तवादिसत्त्वरसादाहवस्तुतस्त्विती माहुः अपरे तु गुणान्यत्वात् सूक्ष्मवान्वहेर्हिंसा रौ गुणकर्मान्यत्वविशिष्टसत्त्वरूद्वृत्तित्वविशिष्टद्रव्यत्वादावतिव्याप्तिवार

णाय साध्यसामानाधिकरण्यस्यावच्छिन्नाधिकरणाध्याधिकरणकृतरूपमुख्यापर्यवसिद्धपक्षावच्छिन्नानधिकरणताव्याप्यसाध्याधिकरणतावच्छेदकत्वघटितत्वता

वद्धेद्रूकूटवत् धर्मवत्त्वमित्यर्थो वाच्यः अनुयोगिकोटौ सत्त्वनिवेशेन अनुगमापत्तेः तथा च सत्तेहवान् द्रव्यत्वादित्यत्र जलत्वे तेजस्त्वोभयपर्याप्तावच्छिन्नाधिकरणताप

सिद्धा नताहशं स्वंत उभयत्वमिति तद्भिन्नत उभयत्वावच्छिन्नजलत्वे तेजस्त्वोभयाद्यावतिव्याप्तिरित्यवसरसादाह वस्तुतस्त्विति शङ्कः यदभावेनेतीति अन्यद्युक्ता

यत्कत मुक्त्यनयोग्यता सा च व्याप्तिपक्षधर्मतारूपा तथा च विशेषितो विशेषितो वा यद्धर्मावच्छिन्नाभावः साध्याभावव्याप्यः साधनवद्वृत्तिस्तद्धर्मावच्छिन्न रम०

उपाधिरिति पर्यवसन्नं अवच्छिन्नसाध्यव्यापकोपाधिसंग्रहाय विशेषितेतरेति शुद्धसाध्यव्यापकोपाधिसंग्रहाय विशेषितेति यद्धर्मावच्छिन्नाभाव निवेशादे

भावादेर्न द्रव्यत्वादिनोपाधित्वं स्वसमानाधिकरणात्यन्ताभावघटितेपि न चात्र संयोगिद्रव्यत्वादिमाद्विभागादौ तदभावादौ चातिव्याप्तिरिति वाच्यं व्याप्तौ प्रतियोगिवैयधिकरण्य
प्रापानिवेशात् केवलान्वयित्येति तथा च संयोगाभावस्य न द्रव्यत्वाभावव्याप्यत्वमिति भावः न च निरवच्छिन्नविशेषणतासंबंधेन व्याप्यत्वमस्त्येवेति वाच्यं विशे
षणतायाविशेषणतात्वेनैव संबंधत्वान्निरवच्छिन्नविशेषणतात्वेन संबंधत्वानभ्युपगमात् तच्च निरवच्छिन्नवृत्तिकत्वविशिष्टसंयोगाभावत्वेन व्याप्यत्वं संभवत्येवेति
वाच्यं व्याप्यवृत्तेरप्यवच्छेदकांगीकारे तदसंभवात् यत्तु गुरुधर्मावच्छिन्नोपाधावव्याप्तिवारणाय यद्धर्मावच्छिन्नोपाध्यभावद्रूपत्वेन यद्धर्मावच्छिन्नव्यापकतावच्छे
दकरूपावच्छिन्नाभावो वक्तव्य इति वस्तुगत्या संयोगाभावस्य तत्त्वेन केवलान्वयित्वेपि न क्षतिर्द्रव्यत्वाभावत्वेन तदवच्छिन्नाभावत्वेन व्याप्यतामादाय संयोगे लक्षणागमस
त्वादिति तदसत् गुरुधर्मस्य प्रतियोगितावच्छेदकत्वांगीकारेणात्र दवच्छिन्नस्योपाधित्वानंगीकारेणावानिर्वाहे गुरुतरनादरशाविवक्षणाभावात् विशेष्येति संयोग
भावेस्य चः गुणो द्रव्यत्वाभाववान् गुणत्वादित्यत्र विशिष्टादित्वस्यैव सम्यक्त्वादिति भावः अन्वयमितियद्भावत्वेन व्याप्यता वाच्या विवक्षणादिमाशयं यद्भावम
न्तृत्वीतिन च यद्भावत्वेनैव सम्यक् अभावरूपोपाधावव्याप्तेः अव्याप्तिः द्रव्यं सत्त्वादित्यत्र संयोगादावव्याप्तिः यद्द्रव्यत्वेन वेतीति तथा च संयोगवद्भवत्वस
गुणो द्रव्यत्वाभावोत्र व्यापकत्वेन जले गंधाभावानुव्यापकत्वेन च द्रव्यं सत्त्वात् गंधवत्द्रव्यत्वादित्यत्र संयोगादावव्याप्तिरिति व्याप्तिस्त्वेति भावः न व्याप्यव्यभिचारि
त्वसाधनव्यापकसंयोगादावुपाधित्वावारणाय यद्भावेनेति कस्येयद्भावमात्रनिधर्मपुरस्कारेण व्याप्यता प्रवेशगौरवमिति लाघवाय यद्रूपत्वेन वेत्युक्तं

मित्याहुः मामास्तु यद्धर्मत्वेन वेति कस्येपि यद्धर्मवत्त्वमात्रवृत्तिधर्मपुरस्कारेण व्याप्यता प्रवेशनीय अन्यथा धूमवान्वह्नेरित्यादौ महानसीयवह्न्यादिमद्भेदसा
योगोलकवृत्तित्वविशिष्टत्वादिना साध्याभावव्याप्यत्वेन तदवच्छिन्नस्य वन्ह्यादिमद्वृत्तित्वेन च महानसीयवन्ह्यादावतिव्याप्तेः तथा च नव्यो मणुद्धमेवेत्याहुः अथ यदभा
वेनेत्यादिकमप्यद्द्ययोपि द्रव्यं गुणादित्यादौ द्रव्यान्यसत्तावद्भेदे इति व्याप्तिः द्रव्यान्यसत्तारूपस्य तदभावस्य तद्धर्मत्वस्य च साध्याभावव्याप्यत्वात् गुणावृत्तित्वा
च्चेति चेन्न तादृशाभावप्रतावच्छेदकावच्छिन्नाधिकरणाभावात् साधनवद्वृत्तित्वविरहात् अप्रसिद्धत्वादित्ति दूदमुपलक्षणं यदभावेनेति लक्षणे जलत्वतेजस्
त्वोभयत्वावच्छिन्नाभावस्य केवलान्वयितया स्नेहाभावव्याप्यत्वादित्यादित्युक्तं पूर्वे तियद्धर्मावच्छिन्नाभावेत्यादीमर्थः अत्र कल्पेपि वस्तुतस्त्वित्यादिकल्पेपि अ
स्यापि जलत्वतेजस्त्वयोरुभयत्वेनोपाधित्वस्यापि केचिदिच्छन्त्यस्वरसं सूचयन्नाह वस्तुतस्त्विति पर्याप्तिवच्छिन्नस्य पर्याप्त्यवच्छेदकावच्छिन्नस्य साध्यसमानाधि
करणार्द्रेंधनादेरार्द्रेंधनत्वादिनोपाधित्वेप्याहुः उपाधितावच्छेदकस्येति स्वमतेपि अत्रोपाधितावच्छेदकस्येत्यस्योपाधितावच्छेदकतापर्याप्त्यधिकरणस्य द्व
त्तितावच्छेदकत्वं तत्पर्याप्त्यधिकरणत्वं एवं कल्पे पद्धर्मावच्छिन्नाभावाधिकरणीभूतेत्यादिकल्पे वक्तव्यमिति अन्यथा धूमवान्वह्नेरित्यत्र द्रव्यवृत्तित्वविशिष्टद्र
व्यत्वादिनोपाधितापत्तेः द्रव्यवृत्तित्वविशिष्टद्रव्यत्वत्वाद्यवच्छिन्नाभावाधिकरणायोगोलकवृत्तित्वस्य धूमाभाववद्वृत्तित्वव्याप्तत्वादिति भावः अत्र क राम०
ल्पे तु वस्तुतस्त्वित्यादिकल्पे तु लाघवं लाघवादित्ययं यथोक्तलाघवं उपाधितापत्तिरिति जपोगोलकवृत्तित्वविशिष्टत्वादिविशेषितस्य तादृशद्रव्यत्वाभावस्य

धूमाभावोऽव्यापकत्वादिति भावः वैयर्थ्येन विशिष्टांतवैयर्थ्येन धूमाभावेति द्रव्यत्वावच्छिन्नाभावादेरेव धूमाभावोऽव्यापकत्वेन ह्रदवृत्तित्वविशिष्टद्रव्यत्वादिनोपाधि
ताऽवारणासंभवात् अयोगोलकवृत्तित्वविशिष्टत्वादिविशेषितद्रव्यत्वावच्छिन्नाभावादेरेव धूमाभावोऽव्यापकत्वेन ह्रदवृत्तित्वविशिष्टत्वादिनाप्युपाधितावारणासंभ
वादिति भावः वस्तुतस्तु वैयर्थ्येन अयोगोलकवृत्तित्वविशिष्टत्वादेरेव व्यापकतावच्छेदकत्वे शेषवैयर्थ्येन धूमाभावेति ह्रदवृत्तित्वविशिष्टद्रव्यत्वाभावादिमात्रवृत्तिधर्मेण धू
माभावानुव्यापकत्वादित्यर्थः अत एव वह्न्यवृत्तित्वविशिष्टत्वादिनापि नोपाधित्वमिति सारं तथा चात एवेत्यादिपाठः सम्यगेवेत्याशयः अत्र वदंति एवं कृतेऽपि पृथिवीद्रव्यत्वादिस
त्वसंयोगत्वावच्छिन्नाभावाधिकरणाकाशादिवृत्तित्वसामान्यं साध्यव्यभिचारस्थापि साधनवृत्ति चेति साधनव्यापकः संयोगोऽप्युपाधिः स्यादिति यद्धर्मावच्छिन्नयद्वृत्त्यधिकरणा यत्किं
चिद्व्यक्तिवृत्तित्वसामान्यं तत्तद्धर्मावच्छिन्नं वाच्यं तथा च जलत्वं तेजस्त्वोभयवदप्रसिद्ध्या नातिव्याप्तिरित्यत एवेत्यादिपाठः सामान्यादिकर एव यथाश्रुताभिप्राये गौरवात्कथंचित्संगम
नीय इति अन्ये तु दीधितावत एवेत्येवकारोऽप्यर्थे तथा चात एवेत्यस्य अतोऽपि वस्तुतस्तु कल्पान्तरपरिग्रहणादपीति यावदित्यर्थः करणेनापि नाप्रकारांतरेणाप्यतिव्याप्त्यभा
वसमुच्चयाऽव्याप्त्यनुपपत्तिरित्यत एवेत्यादिपाठः समंजस एवेत्याहुः प्रकृतेति पक्षव्यभिचारित्वेनेत्यादिपूर्वोक्तिरित्यर्थः संसर्गोऽति संबन्धितावच्छेदकेत्यर्थः तत्परतया वस्तुत
स्थितिकल्पपरतया अनुमान इति अत्र करणाभाववत्सु सन्निभ्याम् अनुमानशाब्दस्यानुमितिजनकज्ञानमनुमितिः कार्यः इत्यत्र यथासंख्येन हेतुमत्त्वाभावेन साध्यव
त्समानेचावयत्साध्याभावेति साधनवतीमनुपपत्तेनद्व्दिति तदा कर्मणोपाध्यभावसाध्याभावयोः परिग्रहः अनयोः पूर्वकल्पे तत्तत्त्वयोरित्यर्थः अवच्छिन्नत्वस्याप्य

५

म॰ प्र॰

वर्त्तकत्वादाहडउपाधितेति पुनःशब्देन तादृशोपाधित्वाभावः सूच्यते तस्याशयेनाहव्यभिचारानुमानस्येति पूर्वस्य साध्यसमानाधिकरणत्वेनेतरस्य द्वितीयस्य साध्यस
मानाधिकरणवृत्तित्वेन वेतरस्य नोपाधित्वमिति इदं च पूर्वकल्पाभिप्रायेण द्वितीयकल्पे तदवच्छिन्नाभावस्येत्याद्युक्तरीत्योपाधित्वापत्त्यभावात् अत्र यद्धर्मावच्छि
न्न यद्धर्मीसाध्ये सर्वत्रावच्छेदकत्वं तत्समर्यादयाधिकरणत्वं तेन नोपाधित्वापत्तिरिति तात्पर्यं प्रथमविवक्षेति पूर्वकल्पानुसारेणेत्यर्थः दीधितौ जलह्रदत्वेति जलत्व
ह्रदत्वेत्यर्थः एवमग्रेपि व्याख्यायां द्वितीयविवक्षायां तु वक्ष्यमाणत्वात्तत्समाधिकल्पेनु व्यभिचारितयेति धूमवत्त्वादौ किंचिद्विशेषणेति निर्धूमवृत्तित्वादिविशेष
णेत्यर्थः व्यर्थतयाविशेष्यह्रदत्वाभावस्य व्यर्थतया तदनुसारेणाद्वितीयकल्पानुसारेण तद्विशेषणांशे साध्यसमानाधिकरणत्वादिविशेषणांशे साध्यसमानाधि
करणत्वादिति तथा च स्पर्शाभावस्य जलपरमाणुजन्मान्तरत्वावच्छिन्नसाध्यव्यापकतया साधनाव्यापकतया च संग्राह्यत्वमेवेति भावः पूर्वं तेन जलह्रदत्वा
भावे साध्ये नात्तद्वारणेति न्यूनत्वस्योपाधित्ववारणेत्यर्थः तदंतर्भाव्यापि पदार्थावस्योत्तरापकतावच्छेदककोटिप्रविष्टत्वविवक्षणामप्युपगम्यापि तत्र स्पर्शाभाव
जात्यभावादौ व्याप्तिवृत्तिं साध्यसमानाधिकरणत्वादिविशेषणाव्याप्तिवृत्तिं उपमत्तस्यापि पूर्वकल्पस्यैतिशे[illegible]षः तदभावस्य शीतस्पर्शजलत्वाद्यात्मकाभावस
शब्दलाघवायेति अप्रथमाशी तस्य शीतजलत्वादिमद्वृत्तित्वेनेत्युक्तौ शब्दगौरवापत्तेरिति भावः उत्तरत्रापि प्रतियोगिनस्तद्वृत्तित्वस्यैव वेत्यत्रास्य तदवृत्तित्वस्यैवेत्यत्र राम॰
च यथायथं यथोक्तरीत्या वोध्यं शब्दलाघवाय प्रथमोपस्थितस्यापि चरमदूषणदानं वोध्यं इदं च तदंतर्भाव्यापि तत्र व्याप्तिदानं चेष्टोद्धिवारणेति उक्तविवक्ष

णासंभवेपि तदभ्युपगमवादेनेसमर्थः। तथाविवक्षायां तदंते भावविवक्षायां सउपाधौ महाकालान्यत्वप्रकारकप्रमाविशेष्यत्वादेरुक्तत्वात् द्वितीयकल्पस्यावतारणिकायामुक्तत्वा
त्ववस्समारणालक्षणाक्रांत इति घटे साध्यव्यापकत्वात् गगनादेः साधनाव्यापकत्वादिति भावः। घटोपर्युसन्नदिनष्टघटे घटत्वाभाववद्दसंयुक्तत्वेन साध्याव्यापकत्वमा
शंक्याह घटोपर्युसन्नेति घटत्वाभाववत्त्वस्य तत्र घटावयवे इत्येव सांप्रदायिकः पाठः। क्वचित् घटत्वाभाववत्संयुक्तत्वस्य घटावयवे स्थितिपाठः स तु प्रामादिकः। वस्तुतो ग
गनादेरवृत्तिता दाहवृत्तिमते त्विति। दीधितावुपाधिरेवेति एवकारः साधकमित्यनंतरं योज्यः। तेन साधकत्वाभाववदवच्छेदलाभः। पथा प्रकृतेऽवतारणिकायां साधत्वाभा
वस्यैवोक्तोपाधित्वाभावस्यानुक्तत्वाच्चासंगत्यापत्तेः। उक्तरीत्या उपाधिकल्पवैयर्थ्येन साधकत्वाभावे कथं साधकत्वमत आहत्याख्यायां घटत्वादेरिति महाकालान्योघटा
दिसत्त्वोक्तरीत्या सदुपाधावव्याप्यापदभावस्य व्याप्यतावच्छेदककोटिप्रवेशासंभवादाह प्रौढिवादेनेति। अभ्युपगमवादेनेत्यर्थः। घटत्वव्यभिचारित्वस्य सत्ता
दिति। गगनपरिमाणादिनिष्ठवृत्तितात्मकयोर्घटत्वव्यभिचारितद्घटत्वव्यभिचारित्वयोरभेदादिति भावः। घटत्वव्यभिचारित्वस्य सत्त्वादिति पाठे सत्त्वादित्यस्य प्रवेशात्यादिः
क्वचित् घटकत्वस्य सत्त्वादिति पाठस्तत्र सत्त्वादित्यस्य घटत्वव्यभिचारित्वे सत्त्वादित्यर्थः। समवायेन वृत्तित्वप्रवेशादिति तथाच रूपादिवृत्तितात्मकस्य घटत्वाभाववत्संयुक्तत्वा
भाववत्समवेतत्वरूपघटत्वव्यभिचारित्वव्यभिचारित्वस्य घटत्वाभाववत्संयुक्तत्वरूपघटत्वव्यभिचारिताभेदेन संभवतीति भावः। द्रव्यमुपलक्षणं तासमवायेनेत्यादि
द्वितीयकल्पद्रवात्रापि वैयर्थ्याभावो वृत्तित्वभेदात् तदङ्कथमः। क्वचित् वृत्तिताप्रवेशादिति पाठः स तु लेखकप्रमादकृत इति ध्येयं घटत्वव्यभिचारित्वस्य घटत्वाभाववत्समवे

नं० प० ततात्मकघटत्वव्यभिचारित्वस्य तदभावस्य तादृशघटत्वव्यभिचारित्वाभावस्य अखंडत्वे घटत्वाभावभिन्नत्वे घटत्वाभाववृत्तिपदार्थे तादृशघटत्वव्यभिचारित्वाभा
वासत्वेन समनियतत्वाभावादिति भावः तत्र घटनीति घटत्वव्यभिचारित्वाभावव्यक्तीनामर्थः घटत्वव्यभिचारित्वाप्रवेशादिति निरूपकतावच्छेदकभेदेन द्वित्वस्य भेदादितिभा
वः वैयर्थ्याभावेप्यनतिप्रयोजनकत्वादाह वस्तुतस्त्विति नाविवक्षितइति अन्यथा महाकालान्योन्याभावादिसत्त्वोपाधावव्याप्तेरिति भावः घटत्वेति तथा चेमादिआशयं मत्वेति
तथा च भातारां केयामिति भावः प्रतियोगिनः प्रतियोगितावच्छेदकावच्छिन्नस्य तद्वृत्तित्वस्यैवेति एवकारो प्रतियोगिन इत्यत्राप्यन्वेति दीधितावप्येवं तद्यथाचैवकारमवच्छे
द्यस्यायोगोलकत्वाभावाभाववत्त्वावच्छिन्नेन तद्वृत्तित्वे वा हेतुत्वसामानाधिकरण्ये वानुपाधित्वे हेतुरिति ध्येयं भ्रांतिमुद्घाटयति दीधितौ तस्येति व्याख्यायां साध्याभावेति अयोगोलकत्वा
भावाभाववत्त्वावच्छिन्नेनेमादिहेतुतावच्छेदकरूपेणाप्ययोगोलकत्वत्वादिरूपेणाद्युपस्थितत्वात् अयोगोलकत्वादेरुपस्थितत्वात् व्याप्यवच्छेदकत्वमपि नेत्यनुषज्यते नील
धूमत्वादेरिव लघुधर्मघटितस्यैव व्याप्यतानवच्छेदकत्वेन कंबुग्रीवादिमत्त्वादेर्व्याप्यतानवच्छेदकत्वमेवासिद्धमत आहतत्रेति कंबुग्रीवादिमत्त्वादावित्यर्थः लघुधर्मप्रवेशेपी
ति तथा च लघुधर्मघटितस्यापि तत्समनियतस्य गुरुधर्मस्य व्याप्यतावच्छेदकत्वं लघुधर्मस्यावच्छेदकत्वेनैवोपपत्तेरित्याशयः आहुरित्यस्वरसोद्भावनं तद्बीजं तु लघु
ता धर्मघटितस्य गुरोर्व्याप्यावच्छेदकत्वे बाधकाभावः नियमेन लघूपस्थितावेव गुरोस्तत्सारीत्यागस्योचितत्वादिति दीधितौ लक्षणात्साहेति न च लक्षेलक्षणांतित्यस्य राम०
सत्त्वादेतदनर्थकमिति वाच्यं लक्षणापदं यथाश्रुतार्थकमेव न तु मित्रो कारीमादूषणोपाधिकधर्मपरमिति सूचनार्थकत्वात् यद्धर्मेतीति यद्धर्मावच्छेदेन साध्यं प्रसि

द्धमितीत्यर्थः व्याख्यायां तथात्वासंभवात् निरुक्तावच्छेदकत्वासंभवात् मित्रातनयत्वादीनां श्यामत्वाद्यव्यापकत्वात् श्यामत्वाद्यव्याप्यत्वात् श्यामत्वाद्यवच्छेदकत्वे मानाभावाच्चे
तिभावः इदमुपलक्षणं सामानाधिकरण्यविवक्षणेनैव निर्वाहे ऽवच्छेदकत्वविवक्षणे प्रयोजनाभावाच्चेत्यपि द्रष्टव्यं यद्धर्मवतीयद्धर्मवद्वृत्तिसाध्यमित्यर्थः यद्धर्मसामा
नाधिकरण्यविशिष्टसाध्यमितियावत् तथाच मूले यद्धर्मावच्छेदेनेति तृतीयाविशेषणे ऽवच्छेदः सामानाधिकरण्यं प्रसिद्धातीति स्वरूपकीर्त्तनं यद्धर्मसामानाधि
करण्यविशिष्टं साध्यमित्यर्थः सामानाधिकरण्यस्य प्रकारविधया प्रवेशे गौरवादाह तदवच्छिन्नमिति सामानाधिकरण्येन यत्किंचिद्विशिष्टमित्यर्थ इतिभावः व्याख्या
यां तदवच्छिन्नेति यद्धर्मवति साध्यं प्रसिद्धं तादृशं किंचिद्धर्मावच्छिन्नेत्यर्थः सपक्षैकदेशेतीति सपक्षः निश्चितसाध्यवान् एकदेशेति साधनाव्यापकत्वरक्षणाय प्रगल्भम
तमाशंकते दीधितावेवेति साधनवति साध्यमिति साधनसामानाधिकरण्यविशिष्टसाध्यमित्यर्थः तथाच साधनसामानाधिकरण्यविशिष्टसाध्यव्यापकधर्माव
च्छिन्नत्वं पर्यवसितं मित्रातनयत्वादेः शुद्धत्वाद्यव्यापकत्वात् साधनसामानाधिकरण्यं साध्ये विशेषणं साध्यसाधनसंबंधेति संबंधः सामानाधिकरण्यं तस्य च व्या
प्यतास्वनिरूपकव्यावर्त्तकत्वसंबंधेन तथाच लाघवादाह व्याख्यायां साधनविशिष्टेति सामानाधिकरण्येनेत्यादि साध्यसाधनसंबंधेति साधनविशिष्ट
साध्येत्यर्थः साध्यसमानाधिकरणेति न चैवमपि लक्ष्यतावच्छेदकस्य इदं द्रव्यं सत्त्वादित्यादिविरहवृत्तिगुणादिसाधारण्येऽव्यभिचारं साधनतावच्छेदकस्य द्रव्यत्वस
त्तात्वादेर्द्रव्यत्वादिसमानाधिकरणशुद्धसत्तात्वादिति वाच्यं हेतितानेन साध्यवद्भिन्नाधिकरणतानिरूपकतावच्छेदकत्वविवक्षणात् यथाश्रुतशब्दात् यद्

भ.ग्र.

र्मावच्छेदेनसाध्यमित्यादिस्मिन्नत्वशब्दात्तल्लाभः लाभो वाच्यः इतीति तदसंग्रहस्तत इत्याशयात् आह तथैवाह तादृशधर्मान्तरेति साधनव्यापकीभूतद्रव्यत्वादिधर्मस्येत्यर्थः अभ
तरत्वमिति साधनवत्सामान्यसाध्यवदन्यतरत्वमित्यर्थः दीधितौ नोपाधिरिति किंतु वायुभिन्नत्वादिरिति शेषः व्याख्यायां ताद्रूप्येणाव्यभिचारित्वेन व्याप्यत्वं तद्घटकध्या
न्ननिरूपकतासंबंधः दीधितौ यद्व्यभिचारस्य इति निरूपकतासंबंधेन यद्व्यभिचारवतीत्यर्थः साधनस्येति देहलीदीपन्यायेन यद्व्यभिचारे साध्यव्यभिचारे चान्वे
ति तथा च निरूपकतासंबंधेन साधननिष्ठव्यभिचारस्य साधननिष्ठसाध्यव्यभिचारव्याप्यत्वलाभः व्याख्यायां तत्त्वेपि निरूपकतासंबंधेनोद्भूतरूपव्य
भिचारसत्वेपि उद्भूतरूपावच्छिन्नेति साधनव्यापकीभूतधर्मावच्छिन्नेत्यर्थः साध्याव्याप्यकत्वमिति बहिरिन्द्रियाग्राह्यत्वस्येति शेषः अतीन्द्रियधर्मसमवायीति स
मवायेनातीन्द्रियधर्मवानित्यर्थः जनकत्वावच्छिन्नस्येति जनकतास्यजनकत्वरूपसाधनव्यापकत्वादिति भावः साध्यस्येति गुरुत्वस्य पतनात्मककार्यानुकूलातीन्द्रि
यत्वादिति भावः बहिरिन्द्रियाग्राह्यत्वस्य घटादौ साध्यव्यापकत्वात्कथमुपाधित्वमत आह अगुरुत्वावच्छिन्नेति इति मतेति स्पर्शवन्मात्रवृत्तित्वमते च तस्यामूर्तत्वा
वच्छिन्नसाध्यव्यापकत्वं बोध्यं दीधितौ बहुलयं च विरोधादिति शाब्दो द्रव्यसाक्षात्संबंधेन गन्धमानात्वादिसत्त्व बहिरिन्द्रियवेद्यत्वावच्छिन्नसाध्यव्यापकस्य सावय
वत्त्वोपाधेर्वर्धमानोपाध्यायैरुक्तत्वात् द्वित्वे घट इत्यर्थः व्याख्यायां लक्षणयाप्यन्योपाधिपरतयेति लक्षणयान्योपाधिपरतयापीति योजना वकिल्वर एम०
प्रकारकपक्षसत्ताभावात्मकोपाधिपरतयापीत्यर्थः घटइतिसघटइत्यर्थः तद्द्वये सतीसाध्याभावात्सत्त्वाच्चेति पंचमं तद्धर्मरूपव्यापकसावच्छिन्नमेतत्

हेतुत्वेनाचेति उपाधित्वं स्यादिति न च पृथिवीत्वादेर्व्याप्यवृत्तितया किंचिदवच्छिन्नत्वाभावादेव नोक्तरीत्या तद्घटान्यत्वस्योपाधितापत्तिरिति वाच्यं व्याप्यवृत्तेरप्य
वच्छेदकसंगीकृत्यैतदभिधानात् अन्यथा व्याप्यवृत्तिसाध्यसाधनस्थलीयोपाधिमात्रे स्याव्याप्तिसत्त्वेन दीधितिकृता तल्लक्षणकथनेन न्यूनतापत्तेः यत्तु पृथिवीत्व
५५ पक्षस्यावृत्तिपृथिवीत्वप्रकारकस्मृतिविशेष्यत्वपरमतो नोक्तदोष इत्तित्र यथाश्रुतमुक्तन्यूनतापत्तेः दीधितौ सामानाधिकरण्येनेति तृतीयाभेदे नवीनास्तु सा
मानाधिकरण्येनेत्यस्य सामानाधिकरण्यसंबंधेनेत्यर्थः न च तेन संबंधेनोत्पत्तिकालीनत्वविशिष्टरूपवत्त्वं न तद्घटे इति तद्घटान्यत्वस्योपाधित्वं स्यादिति
वाच्यं उपलक्षणतया पद्धर्मनिवेशेनादोषादित्याहुः तत्तत्त्वं सामानाधिकरण्यविशिष्टरूपवतीत्यग्रिमदीधितिग्रंथास्वारस्यात् व्याख्यापांयद्धर्म
सामानाधिकरण्यविशिष्टत्वमेवेति यद्धर्मोपलक्षितधर्मिवृत्तित्वविशिष्टत्वमित्यर्थः उक्तातिप्रसंगं वारयति दीधितौ न चेति तद्व्यापकमित्यपि मात्रं च पिन
हीत्यर्थः तद्घटोत्पत्तीति तद्घटोत्पत्तिक्षणावृत्तित्वविशिष्टरूपवतीत्यर्थः न चोत्पत्तिक्षणावृत्तित्वस्य तद्घटे उत्पत्तिक्षण एव सत्त्वेन तदा च तत्र रूपासत्त्वेन कथं तादृशरूपव
त्त्वं तद्घटे इति वाच्यं यद्धर्मस्योपलक्षणतयैव निवेशितत्वेनादोषात् तद्व्यापकं उक्तसामानाधिकरण्यविशिष्टरूपव्यापकं व्याख्यापां अनुगमय्येति लक्षणमाहेत्य
त्राच पः नन्वत्राप्यवच्छिन्नसाध्यव्यापकोपाधौ शाकपाकजत्वादौ साधनाधिकरणासाधनाधिकरणावृत्तिधर्मप्रमेयत्वावच्छिन्नसाध्यस्याधिकरणमात्र एव
सत्त्वेन तादृशधर्मावच्छिन्नसाध्यव्यापकत्वाभावेनाव्याप्त्यापत्तेः तद्धर्मो विशिष्येव यावद्यदनुक्तरीत्या लक्षणतामेदन्नावश्यक इत्यत आह साधनाव्यापकत्व परि

भ.प्र.

सागेनेति तद्वृत्तौ पर्वत इति धूमवान्वह्नेरित्यादावयं पिंडत्वतानसामतरत्वादिरेव तादृशो धर्मस्तमादाय लक्षणसमन्वयः तत्साध्येतियं जनकत्वाद्यनधिकरणधूमाधि
करणपर्वतादिवृत्तिपर्वतत्वाद्यवच्छिन्नसाध्यस्य पर्वतादौ सत्त्वात्तत्र यंजनकत्वाद्यभावान्नतत्रातिव्याप्तिरिति भावः दीधितावच्छिन्नसाध्यत्वेन तादृशधर्मावच्छि
न्नसाध्यत्वेन तादृशधर्मसामानाधिकरण्यविशिष्टसाध्यत्वेनेति यावत् उक्तरीत्या सामानाधिकरण्यरूपस्यैवावच्छेदकत्वस्यानिवेशात् व्याख्यायां धूमत्वे
नेवेति लाघवेनेत्यादि एवकारेण तादृशधर्मावच्छिन्नधूमत्वव्यवच्छेदः तादृशावच्छेदकधर्मेति स्वानधिकरणसाधनाधिकरणवृत्तिधर्मेत्यर्थः धूमवान्वह्नेरित्यादौ
धूमाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य तादृशधर्मावच्छिन्नधूमाधिकरणघटितनिरुक्तावच्छेदकत्वासमवैव सेनन्नावच्छेदकत्वसंभवदत्त आह तद्रूप
वान्द्रव्यत्वादित्यादाविति तद्रूपाधिकरणे साध्यद्रव्यमुपलक्षणतांतद्ध्रुक्तित्वेन तदधिकरणघटितस्यैवानवच्छेदकत्वसंभवेन तद्रूपघटितसमानौरवेणानवच्छेदक
७ त्वादित्यपि द्रष्टव्यं तादृशोतिचालनीमायेनेत्यादिः वस्तुतस्तु तादृशधर्मावच्छिन्नसाध्यव्यापकत्वे तादृशधर्मसामानाधिकरण्यविशिष्टध्याधिकरणवृत्त्यन्यो
न्याभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदवत्त्वं तथा च तद्रूपवान्द्रव्यत्वादित्यादौ शुद्धसाध्यव्यापकोपाधावव्याप्ति लक्षलाघवेन तदधिकरणवृत्त्यन्योन्या
भावप्रतियोगितावच्छेदकत्वस्यैव भेदप्रतियोगितावच्छेदकत्वेन तादृशधर्मसामानाधिकरण्यविशिष्टतद्रूपाधिकरणवृत्त्यन्योन्याभावप्रतियोगितावच्छे राम०
दकत्वस्यानवच्छेदकत्वेन तादृशभेदाप्रसिद्धेरित्याशयेनाशंकनेदीधितौ यद्यपीति तादृशान्योन्याभावप्रतियोगितानां विशिष्योपादानान्न दोषस्तथाश

येनाहृतयापीतित्वं मामास्त्वतद्धर्माधिकरणीभूतेसादेः स्वानधिकरणेऽसाधनस्य साध्यव्यभिचारोपन्न यत्र च स्वाधिकरणेऽसाध्यं तदुभयमात्रवृत्तिर्यो धर्मस्तदव
च्छिन्नसाध्यवत्त्विभेदप्रतियोगितानवच्छेदकत्वमर्थः प्रतियोगितान्तत्स्यतादृशभेदप्रतियोगितानां परित्यापकत्वात् तासां च विशिष्यैव निवेशः अतो नोक्तदोषः एवं चै
तस्य लक्षणस्यैकस्मिन्नेवोपाधौ व्याप्यतावच्छेदकधर्मभेदात्रभेदोपि अतएवायेऽनुमानत्र कारेण नैवेत्यादिना उभयत्र वृत्तिरित्यंतं व्याख्यातं दीधितिकारस्तु आहुः दी
धितौ तद्व्यापकत्वे तादृशधर्मावच्छिन्नसाध्यव्यापकत्वं प्रसिद्धमेवेति तत्याचैतादृशव्यापकत्वस्य प्रकृतेविवक्षणान्नोक्तव्याप्तिरिति भावः व्याख्यापांघटत्वुपाधित्वे इति
प्रसस्त्वसाध्यकव्यभिचारित्वा वा तुः प्रमस्य प्रमेयत्वादिसाध्यात्साध्याव्यापकस्योद्भूतरूपवत्वोपाधेः वहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वेपि वोपाधित्वस्य क्षुण्णत्वादिति भा
वः एवमपि कस्यचिन्निरुक्तोपाधित्वस्य परिसागएवेत्यत आह वहिर्द्रव्यत्वमिति तथा च निरुक्तोपाधित्वस्याक्षुण्णत्वमेवासिद्धमिति भावः अत्र जन्यत्वावच्छिन्नसाध्यवतिघ
टीपरूपादावुद्भूतरूपाभावात्तदवच्छिन्नसाध्यव्यापकत्वमतो घ्राणकजन्यत्वमुक्तं न चैवमप्यघ्राणजन्यत्वमेव सम्यक् किं घ्राणकपर्यंतानुधावनेनेतिवाच्यं मनसोऽप्य
घ्राणतया तज्जन्यत्वावच्छिन्नपक्षसत्त्ववतिज्ञानादावुद्भूतरूपवत्त्वाभावेन तदवच्छिन्नसाध्यव्यापकत्वासंभवेन तत्पर्यंतानुधावनस्यावश्यकत्वात् दीधितौ घ्राणकजन्यत्वादीत्या
दिना घ्राणकरूपश्रावणकत्वमनरत्वादिपरिग्रहः व्याख्यापांसस्पेतिरसस्पेतिरूपत्वे स्पर्शः क्वचित्पठ्यतेव पाठः तथा त्वाभातसाधनावच्छिन्नं पक्षधर्मावच्छिन्नं वा साध्यं प्रति
व्यापकत्वाभावात् वहिर्द्रव्यत्वादेः स्वानधिकरणीभूतसाधनाधिकरणावृत्तित्वाभावादिति भावः व्याप्तिकुरिति अत्र पक्षगुरुत्वापरत्वरूपपक्षधर्मावच्छिन्नं साध्यं प्रत्युद्

म॰प्र॰

तद्रूपवत्त्वस्य व्यापकत्वात् तथात्वाभावस्यासिद्धत्वस्य स्फोरणायोक्तः दीधितावेवं चेति उक्तलक्षणघटकरणे चेमर्थः तद्वृत्तित्वादि तद्व्यभिचारेण तद्वृत्तित्वे सति तद्व्य
भिचारेण तद्वृत्तित्वविशिष्टोपाधिव्यभिचारेणेति यावत् तथा च तादृशधर्मवान् यदुपाध्यभाववान् तद्वृत्तित्वेनेति ध्रुवर्थः वृत्तित्वरूपविशेषणप्रयोजनाभावात् ए
वं च धूमवान् वह्नेरित्यादावयोगोलकमहानसान्यतरत्वादिरेव तादृशो धर्मस्तद्वृत्तित्वे सति साइंधनव्यभिचारेण वह्नौ धूमव्यभिचारः साधनीयः सहयाभोभिचा
तनयेत्यादित्याशैभिष्याः ननु पक्षादिरेव तादृशो धर्मः व्याप्तुः पक्षस्याः प्रमेयत्वादित्यादौ वह्नि ईश्वरत्वादिरेव तादृशो धर्मः शेषं पूर्ववत् यथा च वह्निद्रव्यत्वादेस्ता
दृशत्वं तत्स्थेनुपदमेव व्यक्ती भविष्यतीत्याख्यायां तत्सदृश्याराः पदमन्तरमिति तत्समस्पर्धी भेदः दुतरूपव्यभिचारघटकोद्भूतरूपाभाववद्वृत्तितः व्यभिचारा भा
वादित्यतादृशान्यतरस्योद्भूतरूपाभाववतोऽप्रसिद्धेरिति भावः व्यभिचारात् व्याप्यत्वादित्यात्मत्वे व्यभिचारादिति भावः विशेष्यभागे इति तादृशधर्मवद्वृत्ति
त्वे सति उपाधिव्यभिचारेण साधने साध्यव्यभिचारानुमाने हेतुतावच्छेदककोटानुपाधिव्यभिचाररूपविशेष्यभागसार्थक्यार्थमित्यर्थः अयमाशयः अत्र
चेत्यादिदलानुपादाने व्यभिचारनिरूपकाधिकरणमात्रवृत्तितादृशधर्मवद्वृत्तित्वस्यैव साध्यव्यभिचारव्याप्यत्वसंभवेनोपाधिव्यभिचाररूपविशेष्यस्य वैय
र्थ्यं तदुपादाने च व्यभिचारनिरूपकाधिकरणसाध्यवदभाववृत्तिधर्मस्यैव तादृशत्वे न तद्वृत्तित्वस्य साध्यसमानाधिकरणधर्मे व्यभिचारेण साध्यव्यभिचा रा१०
रव्याप्यत्वासंभवादव्याप्तेः तत्सार्थक्यमिति प्रवेशे तत्साधारणसाध्याधिकरणत्वप्रवेशे साध्याधिकरणे तत्सम्प्रवेशोऽत्रियावत् तन्मात्रवृत्तिधर्मस्यानधिकरणा

साध्याधिकरणमात्रवृत्तिधर्मे आलत्वे इति यावत् व्यभिचारस्याग्रिमेण व्यभिचार इति गगनात्मान्यतरत्वरूपतादृशधर्मवद्वृत्तित्वे सति उद्भूतरूपव्यभिचारेणाप्रसक्तव्यभि-
चारसाधने व्यभिचार इत्यर्थः। यत्र स्वानधिकरणे साधनस्य व्यभिचारो यत्र स्वाधिकरणं तदुभयमात्रवृत्तिगगनपरमाण्वन्यतरत्वमपि तद्वृत्तित्वे सति उद्भूत-
रूपव्यभिचारस्य न प्रसक्तत्वव्यभिचारव्याप्यत्वं विशेष्यभागवैयर्थ्यादित उक्तं दीधितौ साध्यमिति तदुभयवृत्तिधर्मस्येति प्रमेयत्वादेरित्यर्थः। व्यभिचार इति तादृश-
धर्मवद्वृत्तित्वे उद्भूतरूपव्यभिचारस्याप्रसक्तत्वात् सत्त्वेन तत्र प्रसक्तव्यभिचाररूपसाध्याप्रसक्तत्वादिति भावः। अथ तदुभयमात्रवृत्तित्वं तदुभयेतरावृत्तित्वे सति तदुभ-
यवृत्तित्वं तथा च वायुः प्रत्यक्षः स्पर्शादित्यादौ वह्निर्द्रव्यत्वादेरसंग्रहः तस्य तदुभयेतरस्मिन् परमाण्वादौ वृत्तित्वात् न च तस्यासंग्रहेऽपि न क्षतिः परमाण्वन्यतरत्वादिरूपता-
दृशधर्मस्यात्रापि सत्त्वे तत्रोद्भूतरूपादौ व्यभिचाराद्यनुमापकत्वसंभवादिति वाच्यं तथा सति वह्निर्द्रव्यत्वे सति उद्भूतरूपाभावादित्यग्रिमव्याख्यानविरोधापत्ते-
रिति चेन्नैवं अग्रिमात्रपदेन स्वानधिकरणसाध्याधिकरणवृत्तित्वमात्रं विवक्षितं तेन तद्वृत्तित्वेऽपि धर्मस्य तद्वृत्तित्वे सत्युपाधिव्यभिचारस्यातः साध्य एव साध्यव्य-
भिचारव्यभिचारित्वेन साध्यव्यभिचारव्याप्यत्वासंभवात् यत्र च स्वाधिकरणे साधनस्य साध्यव्यभिचारस्तद्वृत्तित्वस्यावच्छेदकत्वाभिप्रायेण विवक्षितः तद्वृत्तिधर्मे
उपाधिव्यभिचाराभावेन साध्यव्यभिचाराभावाभावेन तद्वृत्तित्वे सत्युपाधिव्यभिचारस्य साध्यव्यभिचारव्याप्यत्वसंभवात् तथा च द्रव्यत्वे न स्वानधिकरणसाध्याव-
द्वृत्तिर्यस्तदुभयवृत्तिधर्मस्तस्य लाभेन वह्निर्द्रव्यत्वादेः संग्रहः सुलभ एवेति दिक्। एतस्यापि स्वानधिकरणीभूतेत्यादेरपि नैष्फल्यं इति। स्वत्वस्याननुगतत्वा-

१०

प्र० भ०

दिति भावः लक्षणांतरं स्वत्वाघटितत्वरूपं अतिप्रसंगेति । व्यंजनवत्वादावित्यादि ननु समानाधिकरणाधिकरणात्वस्य साधनवद्विशेषणापि व्यंजनवत्वादावितव्याप्तिर्ध्या
रासाध्यासमानाधिकरणत्वस्य साध्यानधिकरणत्वस्य साध्यानधिकरणवृत्तित्वरूपतया व्यंजनवत्वादेः साध्यानधिकरणवृत्तित्वे पतादिमद्भ्रमादि करणपर्वतादि निष्ठा
भावप्रतियोगितावच्छेदकत्वमर्थवत्वादत आह । साध्यासमानाधिकरणत्वं चेति । साध्यवदवृत्तित्वमिति । साध्यासमानाधिकरणवृत्तित्वस्य साध्यानधिकरणवृत्तित्वरूपत्वेऽ
पाधिशरीरे मान एव साधनवति साध्यवदन्यत्वमाने मो माभाव घटितसाध्यव्यभिचारस्य प्रथमत एव स्फूर्तौ उपाधिना साध्यव्यभिचारानुमानवैयर्थ्यापत्ते रिति भावः । अधिकरणा
तमिति । अत्र प्रतियोगिवैयधिकरण्यं व्याप्तिसिद्धांतलक्षणोपदर्शितरीत्यानुगतं निर्वाच्यं ते न तत्स्वत्वघटिततयानुगमशंका निरस्ता केचित्तु व्याप्यवृत्तित्वमेव निरवच्छिन्न
वृत्तिकत्वरूपमभावे विशेषणं भेदघटितं वा लक्षणं निर्वाच्यं न तु प्रतियोगिवैयधिकरण्यनिवेशमित्याहुः । नोपाधित्वमिति । अतो न तदवच्छिन्नेः आप्तिरितिशेषः । विरुद्धेति नद
वादीत्यर्थः । तद्ध्वंसत्वं सर्वं निरुक्तमित्यादि तेन धूमवान्वह्नेरित्यादौ न वह्न्यवृत्तित्वविशिष्टद्रव्यत्वत्वादिनोपाधितापत्तिः । व्याप्तिलक्षणवदिति । अयमाशयः साध्यव्यापकस्य द्रव्य
त्वादेः संयोगादिनाभाववत्वस्य साधनवति सत्वेन व्यंजनवत्वादेर्न व्यापकताघटकसंबंधेन साध्यव्यापकाभावो वाच्यः समवायेन साध्यव्यापकस्य द्रव्यत्वादेः समवायेना
भावस्य कालिकादिसंबंधेन धूमादिसाधनवति स्वाच्छदाहोसत्वात्साधनवत्वं हेतुतावच्छेदकसंबंधेन वाच्यं आर्द्रेंधनाभावादेरपि कालिकादिसंबंधेन प्रतियोगिसामाना राम०
धिकरणप्रमेय प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यपोक्ताव विविधवित्तया सत्वादेरभावस्य विषयित्वया प्रतियोगिव्यधिकरणस्य साधनवतिस

तेनसमवायेनसत्ताद्यवतिप्रसंगइत्युपाधिताघटकसंबंधेनप्रतियोगिवैयधिकरण्यंवाच्यंहृदत्वादेरपिकालिकादिसंबंधेनसाध्यसमानाधिकरणात्तयोपाधिताघटक
संबंधेनसाध्यसामानाधिकरण्यंवाच्यमिति।साधनपदस्यसाधनाव्यापकत्वघटकसाधनपदस्य।पर्यवसितेनसाध्येवेति।एवकारेणावंचेत्सादिसंभवेदसंतमवछेदसर्वग्र
णत्स्वानधिकरणीभूतेसादित्वरूणात्संबंधेतिउपाधिताघटकसंबंधेनस्पर्शःसंबंधेनतद्भेदेनआह।साध्यव्यापकत्वसाधनाव्यापकत्वेभवघटितमेवलक्षणांवर्णय
तामतमाह सद्धेताविति।वंजनाद्यवतिविशेषः धूमंतमितिव्यापकतावछेदकरूपविशेषणमितिशेषः।तत्रापिसाध्यव्यापकत्वसाधनाव्यापकत्वयोरन्यतरोपादानेवंजनाद्यवति
प्रसंगात्दवस्थ्यंव्यंजनतादेस्साध्यव्यापकतावछेदकद्रव्यत्वादेःसाधनाव्यापकतावछेदकमहानसवृत्तिद्रव्यत्वादेश्चानतिरिक्तवृत्तित्वादत्रसाध्यव्यापकत्वसाधना
व्यापकत्वयोर्द्वयोरुपादानं तादृशरूपसामानाधिकरण्यनिवेशेधूमवान्वह्नेरित्यादौवह्नित्वद्रव्यत्वादिसाधनव्यापकतावछेदकमेरणोपाधितापत्तिस्स्यात्प्यार्द्रेंध
नजन्यवह्नित्वादितादृशरूपसमानाधिकरणत्वादितितत्सामानाधिकरण्यमपहायतदनतिरिक्तवृत्तित्वपर्यंतंनिवेशितं ननुसाध्यव्यापकत्वसाधनाव्यापकत्वयो
यानतिरिक्तवृत्तित्वमेवव्यापकतावछेदकरूपविशेषणमास्तांकिमवछेदकपर्यंतेन सद्धेतौधंननत्वादीनांतदभावाच्चव्यंजनवत्वाद्यवतिप्रसंगःधूमवान्वह्नेरित्या
दौतदनतिरिक्तवृत्तित्वस्यार्द्रेंधनात्वादौसत्वान्नाप्रसंगइत्यतआह वह्निमानिति।।विभिन्नरूपेणेति इत्यत्वतेनसाध्यव्यापकत्वान्महानसवृत्तित्वविशिष्टद्रव्यत्वत्वादि
नासाधनाव्यापकत्वाच्चेतिभावः।तदनतिरिक्तेतिसाध्यव्यापकत्वसाधनाव्यापकतोभयाभावातिरिक्तवृत्तिद्रव्यत्वत्वादिनेत्यर्थः।तच्चवह्निमान्धूमादित्यादौचतत्से

भ॰ प्र॰ कसाध्यसमानाधिकरणवृत्तित्वस्यैव अयं साध्यसमानाधिकरणयत्किंचिद्धर्मव्यापकतावच्छेदकत्वरूपः साधारणपायेति शाकपाकजत्वत्वादेः श्यामत्वादिव्यापक
तावच्छेदकत्वाभावादिति भावः केवलान्वयितावच्छेदकस्यैवेतीदं च साध्यसामानाधिकरण्यस्योपलक्षणत्वाभिप्रायेण तस्य विशेषणत्वे तत्तदवच्छिन्नसाध्य
व्यापकोपाध्यप्रसंगो बोध्यः सर्वसामंजस्ये वृत्तित्वविशिष्टद्रव्यत्वत्वादिनोपाधित्ववारणे गुरुतरारंभः साध्यसमानाधिकरणयत्किंचिदित्यादि तु तद्धर्मि
छुर्षः व्यर्थः निष्प्रयोजनः तेन यथासंनिवेशे वैयर्थ्याभावे विनिगमनविरहात् साध्यवद्वृत्तिताया इति तल्लक्षणवादिने विशेषः यद्रूपावच्छिन्नेति यद्रूपविशिष्टेत्यर्थः प्र
कृते उक्तदोषानुद्धारात् एतेनात्र साध्यसमानाधिकरणयत्किंचिदित्यादेः साध्यवन्निष्ठाधिकरणतानिरूपकत्वावच्छेदकत्वमेव तात्पर्यमतो न पत्वतत्त्वानु
गमोपीति निरस्तो नक्रमपि विंत्यमेव उक्तदोषानुद्धारात् अत्र च एतल्लक्षणोचनतस्योपसंग्रह इति शाकपाकजत्वविशिष्टद्रव्यत्वस्य गौरवमिति तन्न साध्यवृत्तित्वा
नतिरिक्तवृत्तित्वाभावादिति भावः न इदं निरुक्ते इति शाकपाकजत्वविशिष्टद्रव्यत्वत्वस्येत्यादि अतिप्रसंग इति व्यत्व इत्यादि इदमुपलक्षणं अत्र तदनतिरिक्त
वृत्तित्वं तदभाववदवृत्तित्वं तत्र वृत्तित्वमुपाधिनावच्छेदकताघटकसंबंधेनावश्यं वाच्यमन्यथा तादृशरूपायोगोलकादिवृत्तित्वाद्यभावस्य योगोलकवृत्त्या दा
वाद्रेंधनत्वादेः कालिकादिसंबंधेन वृत्तितया तदनतिरिक्तवृत्तित्वानापत्तेः एवं च जातिमान्मेयत्वादित्यादौ तादात्म्येन सत्तउपाधित्वानापत्तिः तत्र सत्तारूप राम॰
तादृशरूपाभाववति जात्यादावुपाधितावच्छेदकताघटकसमवायेन वृत्तित्वाप्रसिद्धेः परंतु तदनतिरिक्तवृत्तित्वमत्र स्वविशिष्टव्यापकतावच्छेदकतादृशरू

पकत्वमतोनोक्तदोषइतिनवीनैरुक्तं तत्रसमाकृ स्वत्वनिवेशेनाननुगमस्यदुर्वारत्वात् यदपितादृशरूपावच्छिन्नाभाववदवृत्त्वमधिकरणतानिरूपकतावच्छे
दकत्वं तदनतिरिक्तवृत्तित्वमतोनकोपिदोषइतितदपिविंसमेवएतद्व्रस्सरणावादिमते साध्यवद्वृत्तितायाःतादृशरूपावच्छिन्नाभाववदवृत्त्यधिकरणा
तानिरूपकताअपितुल्ययुक्त्यास्वरूपसंबंधरूपावच्छेदकतायाअनभ्युपगमेनपूर्वोपदर्शितदोषानुद्धारात् अपिचानुभवसिद्धस्यसाध्यवद्वृत्तितायाःस्व
रूपसंबंधरूपावच्छेदकत्वस्यानभ्युपगममात्रेणनिराकर्तुमशक्यतयासाध्यसमानाधिकरणवृत्तिविदित्यादिगुरुतरारंभोपिनिष्प्रयोजनकएवसाध्य
वद्वृत्तितावच्छेदकत्वस्यैवसम्यक्त्वादित्यपिद्रष्टव्यं अतिरिक्तत्वेतिनचैवमपिसर्वसाध्यसमानाधिकरणवृत्त्यादिप्राचीनग्रंथविरोधोद्रष्टव्यादिहरद्वृत्तिवाच्यं त
न्नहेतोरितिषष्ठ्याअभेदार्थकत्वेनहेतुरूपैकाधिकरणइत्यर्थेनाविरोधात् तद्धेतावेकाश्रयतापाठेतुहेतुरूपेएकस्मिन्नधिकरणेएकस्मिंहेतुव्यक्ताविति पाव
दिसर्थान्नाशंकापिव्यभिचारोन्नायकतेति यथाकथंचिदित्यादिपृथिवीत्वाभावादेरपिद्रव्यत्वरूपव्यभिचारिसमानाद्रव्यत्वजलत्वेतन्नित्यविशेष्यकधीविशे
ष्यतेसतिपृथिवीत्ववद्वृत्तित्वादितिपूर्वोपदर्शितरीत्याव्यभिचारोन्नायकत्वादितिभावः दीधितौपक्षेत्वितिनचैवंधागुरुत्वलक्षणतावच्छेदकस्यतन्नाव्याप्तिरितिवा
च्यं एवंव्यभिचारेरोत्यादिनातत्साधारणलक्षणतावच्छेदकस्यापिनिर्वचनात् तुशब्देनकथकसंप्रदायव्यवहारातिक्रमेणानौचित्यरूपोस्वरसःसूचितः व्याख्यानां
सर्वेमेलक्षणेतिस्वानधिकरणीभूतसाधनाधिकरणेत्यादिलक्षणेसमर्थःतत्रपृथिवीत्वाभावादौविशिष्टाभावेतिअखंडाभावतेत्यर्थः तथाचाखंडाभाव

भ. प्र. ध्यक्तयानवैयर्थ्यमिति भावः। अत्र स्वानधिकरणत्वस्य स्वविशिष्टानधिकरणत्वस्य वा साधनाधिकरणे निवेशे रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावाद्यसं
ग्रहः। तत्र स्वानधिकरणस्वविशिष्टानधिकरणसाधनाधिकरणपृथिवीवृत्तिधर्मावच्छिन्नरूपाव्यापकत्वात्। साधनाधिकरणवाय्वादेः स्वानधिकरणत्वस्ववि
शिष्टानधिकरणत्वाभावादिति स्वविशिष्टसाध्यानधिकरणत्वमुक्तं। अत्र स्ववैशिष्ट्यमुपाधितावच्छेदकसंवंधसाध्यतावच्छेदकसंवंधघटितसामानाधिकरण्यसं
वंधेन वोध्यं। अन्यथा संयुक्तसंयोगादिघटितसामानाधिकरण्यसंवंधेन गगनत्वविशिष्टपर्वतीयवह्न्यादिसाध्यानधिकरणत्वस्य महानसरूपसाधनाधिकर
णे सत्वेन तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकतया आर्द्रेन्धनवत्त्वादावतिव्याप्तेः। साध्यानधिकरणत्वं च साध्यतावच्छेदकसंवंधेन वोध्यं। अन्यथा धूमवान् वह्नेरित्यादौ धूमा
देः कालिकादिसंवंधेनायोगोलकीयवृत्तित्वेनार्द्रेन्धनादिविशिष्टधूमाद्यनधिकरणत्वस्य साधनाधिकरणेऽसत्वेनासंभवापत्तेः। न चैवमप्ययोगोलकावृत्तित्वादेर्विशे
षणतया वह्न्याभावायोगोलकावृत्तित्वादिविशिष्टधूमादेः साध्यतावच्छेदकसंयोगादिसंवंधेनाधिकरणत्वमप्रसिद्धमिति वाच्यं स्ववैशिष्ट्यस्योपलक्षणतया वक्तव्यत्वात् स्ववि
शिष्टयत्साध्यं तदनधिकरणत्वस्यैव निवेशेनाप्रसिद्ध्यभावात्। केचित्तु साध्यपदं साध्यतावच्छेदकसंवंधगर्भस्ववैशिष्ट्यस्य तत्संवंधेनानधिकरणत्वस्य च लाभा
र्थमेवेति वदन्ति। तदसत् उक्तरीत्या साध्यपदस्य पृथिवीत्वाभावाद्यव्याप्तिवारकत्वस्यापि संभवात् वह्निमान् धूमादित्यादौ स्वविशिष्टसाध्यानधिकरणावृत्तिपक्ष
वृत्तिजलमहानसान्यतरत्वावच्छिन्नसाध्यव्यापकतया आर्द्रेन्धनवत्त्वादावतिव्याप्तिवारणाय साधनाधिकरणेति धूमवान् वह्नेरित्यादौ तादृशधर्मावच्छिन्नसाध्य राम०

व्यापकत्वस्य द्रव्यत्वादौ सत्त्वेनातिव्याप्तिरतः साधनाव्यापकत्वनिवेशः पृथिवीत्वाभावादावितिस्वविशिष्टगुरुत्वानधिकरणं तेजोरूपादिरूपसाधनाधिकरणं यत्तेजः
प्रभृति तद्वृत्तिजलतेजोन्यतरत्वाद्यवच्छिन्नगुरुत्वादिव्यापकत्वस्य पृथिवीरूपादिरूपसाधनाव्यापकत्वस्य च सत्त्वादिति भावः दीधितावि द्युपरिष्टादित्यादि इदं पृथिवीत्वा
भावादेर्द्रव्यत्वादिना रूपादौ साध्ये उपाधित्वं रूपादिना गुरुत्वादौ साध्ये चानुपाधित्वं पद्रुत्सादि मूलस्य केचि। त्वि सादिसार्वभौमीयव्याख्या यावद्स्तत इत्यर्थः व्याख्या
याप्रतियोगित्वस्य चेति पृथिवीत्वाभाव इति शेषः सत्वादेर्वेतिनवरूपासमानाधिकरणधर्मसामानाधिकरण्यपदविशिष्टसाधनाधिकरणं वा घाघेवेति तत्समाना
धिकरणाभावप्रतियोगित्वस्य पृथिवीत्वाभावे कथं सत्त्वमिति वाच्यं साधने सामानाधिकरण्यपातस्योपलक्षणात्तयानिवेशात् न व्याप्यत्वेति यावत्ती इति रूपवान् द्रव्यत्वा
द्गुरुरूपादिमत्पृथिवीत्वाभावे इत्यादि अत्र गुरुत्वासमानाधिकरणधर्मसमानाधिकरणं यत्तेजोरूपं तत्समानाधिकरणाभावप्रतियोगित्वस्यासत्त्वमतिव्या
प्यभावे हेतुरूपः स्फुटत्वान्नोक्त इति ध्येयं इदं व्यभिचारानुमानसौकर्यं वह्न्यादौ वह्न्यादौ च धर्मादौ इति आक्षिप्तानादृत्य धर्मसामानाधिकरण्यपर्यायः तदुद्भा
वनेनैव तादृशधर्माद्युद्भावनेनैव अभिमतेति व्यभिचारानुमाने सपक्षः उद्भावनं व्यभिचारानुमानाद्भावस्तत्र इति भावः सिसाधयिषाधीनमेवेति कसंप्रदायानुरोधादि
ति शेषः व्यभिचारमात्रेति विशिष्टाभावस्यातिरिक्तत्वादिति भावः के चितु ननु इदं विशिष्टसत्त्वादित्यादि सहेतौ गुरुत्वाद्यव्याप्तिरत आह साध्याव्याप्यत्वेन वै
नी सवतारणिकामाकुलत्वन्न साध्यव्यभिचारितावच्छेदकत्वस्य साधनतावच्छेदकविशेषणत्वेनैवोक्ताति व्याप्तिविरहात् दीधितौ लक्षणमिति उपाधिपद

भा० प्र० प्रवृत्तिनिमित्तमित्यर्थः व्याख्यायां पौनरुक्त्यमिति। अत्रोच्यत इति मूले लक्षणमिति पूरणीयम् अन्यथा नन्वयात् तथा च यो न रुक्त्यमिति भावः व्यभिचारोन्नायकताव
च्छेदकव्याप्तिपक्षधर्मतयोः कुतो लाभ इत्याकांक्षायामाह दीधितौ तत्रेति पूर्वं व्यापकत्वांतं प्रतीकमिति। अथ प्रतीकशब्दस्य नियतपुल्लिंगत्वेन प्रतीक इत्येव वक्तुमु
चितं न तु प्रतीकमिति नीतिचेन्न प्रतीकशब्दस्य नपुंसकांतस्य भूरिप्रयोगेषु दर्शनेन नियतपुल्लिंगत्वे मानाभावात् यद्वा प्रतीकमिति द्वितीयांतमेव प्रदर्शनार्थमिति मनंत
रं मूलकार आहेति शेषः तथा च प्रतीकशब्दस्य नियतपुल्लिंगत्वेपि न क्षतिरिति व्याख्यायां व्यंजनवत्त्वादिति उक्तरूपस्य पर्यवसितत्वादेरिति शेषः अतिप्र
संगः व्यभिचारानुमापकत्वाभाववति तत्र सत्त्वप्रसंगः तथा च तस्यावच्छेद्याभाववद्वृत्तित्वेनावच्छेदकत्वानुपपत्तिरिति भावः व्यभिचारानुमापकतये। तेऽवच्छेद्य
सत्त्वेनेति शेषः तद् इति प्रसंगस्य तत्र पर्यवसितेत्यादि सत्त्वस्य अदोषत्वादिति अवच्छेद्यासत्त्वे अवच्छेदकसत्त्वस्यैवावच्छेदकत्वानुपपत्तौ दोषत्वादिति भावः ननु एवं त
त्वलक्षणमिति प्रसंगवारणाय शुद्धसाध्यव्यभिचारोन्नायकत्वमेव लक्षणं वाच्यं तथा च अवच्छिन्नसाध्यव्यापको पाधौ शुद्धसाध्यव्यभिचारोन्नायकत्वा
भावाद्व्याप्तिरित्याशंक्याह विशिष्टसाध्येति साधननिष्ठस्य साध्यव्यभिचारस्य विशेषणत्वे उपाधिपदादेव साधने साध्यव्यभिचारस्योधेयव्यभिचारानुमान
वैयर्थ्यादाह तत्साधनेति विशेषणमिति तत्र एको ग्रंथः उन्नायकव्यभिचार इति सावधारणं तेन साध्यव्यभिचारस्यावच्छेदः व्याप्तीति तथा चोपाधिपद राम०
देव व्याप्तिपक्षधर्मतालाभेन निरुक्ताकांक्षा न संभवतीति भावः तस्याः व्याप्तिपक्षधर्मतारूपतद्योग्यतायाः तादृशरूपेण व्याप्तित्वादिना भवतीति तथा चोन्नायकताव

छेदकत्वेनसामान्यरूपेणव्याप्तिपक्षधर्मताद्यभावेऽपिकिंतदवच्छेदकमितिविशेषरूपेणाकांक्षासंभवस्येवेतिभावः।अथपर्यवसितेत्यादेर्लक्षणारूपत्वे
अर्थांतरमितिअपक्षहेतावुपाधित्वस्योन्नायकत्वघटितार्थकत्वाभावेनोक्ताकांक्षानुत्थापकत्वादितिभावःसूचितइतिनचतथापिस्वमतेव्यभिचारोन्नयनासंग
तिःकथंवारणीयेतिवाच्यंव्यभिचारोन्नयनस्यस्वकर्तव्यतयावश्यकत्वेनोक्ताकांक्षामुपगम्यकथंचित्तत्संगतेःसंभवात्।अतएवपूर्वंसाध्यव्यापकत्वेसतिसा
धनाव्यापकस्याप्युपाधित्वमुपेत्यसाधनाव्यापकत्वघटितोपाधिलक्षणांदूषयतांकेषांचिन्मतमाहदीधितौअन्यथात्वितिआख्यायांउपाधित्ववत्।संयोगस्योपा
धित्ववत्।तस्यापिसाधनव्यापकसंयोगाभावस्यापिउचितमितितथाचसाधनाव्यापकत्वघटितलक्षणांनसम्यगितिहृदयं।ननुपदद्रमोमाभावपदसंताभा
वयोरन्यतरत्वसाध्याभावसाधकत्वंसएवोपाधिरितिसंयोगाभाववदन्यत्वाप्रसिद्ध्यामोमाभावस्यसाध्याभावसाधकत्वमानसंयोगाभावस्योपाधित्वम
तआहअमुमेवेति।संयोगस्येति।द्रव्यंसत्वादित्यादावपीत्यादि।तादृशप्रतियोगिनःसाध्याभावोव्यापकव्यतिरेकप्रतियोगिनः।तत्रासंयोगेदीधितौतद्भाववत्त्वमि
भा तिव्यतिरेकवत्त्वमित्यर्थः।अत्रेदमवधेयंतदभाववत्त्वलक्षणाप्रतियोगितावच्छेदकत्वमित्यत्रावच्छेदकत्वंनस्वरूपसंबंधविशेषःस्वरूपसंबंधरूपप्रतियोगितायाःस्व
स्वरूपसंबंधरूपावच्छेदकतांगीकारेणतदभाववत्त्वलक्षणाप्रतियोगितायाःस्वरूपसंबंधरूपावच्छेदकत्वाप्रसिद्धेः।गुरुधर्मस्यानवच्छेदकतयातेनरूपेणोपाधिता
नापत्तेश्चेत्यनतिरिक्तवृत्तित्वमेवव्याप्यत्वपर्यवसितंतद्वाच्यंतथाचद्रव्यंसत्वादित्यत्रद्रव्यत्वाभावोन्नायकीभूतोयोगुणकर्मान्यत्वविशिष्टसत्ताभावस्तदभा

वत्व्याप्यत्वं सत्तात्वेपि वर्त्तत इति सत्तात्वरूपेण साधनव्यापिकायाः सत्ताया उपाधितापत्तिरतो यद्धर्मावच्छिन्नाधिकरणवृत्तिकिंचिद्विशिष्टसत्ताभावप्रतियोगितानव
च्छेदकं साध्याभावो व्यापकीभूताभावप्रतियोगितावच्छेदकं तद्धर्मवत्त्वमिति निष्कर्षः कर्त्तव्यः एवं च स्वरूपसंबंधरूपप्रतियोगिताया अवच्छेदकत्वानिवेशेपि
न क्षतिः ध्वंसत्वादिमत्त्वगुणागमत्वविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकत्वस्य संयोगत्वे सत्त्वेन सत्त्वेन संयोगे लक्षणसमन्वयादिति प्रतियोगित्वं
च तदभाववत्त्वमित्यसंगतमेव यदि च स्वरूपसंबंधरूपप्रतियोगित्वानंगीकर्त्ता वायं तदभाववत्त्वरूपप्रतियोगित्वस्यापि स्वरूपसंबंधरूपावच्छेदकत्वमंगीक्रि
यत एव अन्यथा तन्मतेऽस्मादृशप्रतियोगित्वाभावे प्रतियोगितावच्छेदकत्वस्यैवासिद्ध्यापत्तेः एवं गुरुरूपेणोपाधितायाश्चानंगीकारेण तेन रूपेणोपाधिता
नापत्तिरपीष्टैव एवं ध्वंसत्वादिमत्त्वसाधनव्यापकसत्ताया अप्युपाधित्वाभिधानमेवं एतन्मते साधनव्यापकस्योपाधित्वानुपगमादिस्तुपदर्शितनिष्कर्षकरणप्र
योजनाभाव इति दिभा या ते तथापि स्वरूपसंबंधरूपप्रतियोगित्वस्यानिवेशेपि ध्वंसत्वादिमत्त्वसंयोगाभावस्य गुणादिवृत्तित्वविशिष्टसंयोगाभावत्वेन ध्वंसत्वाभा
वो व्यापकतया संयोगे लक्षणमस्तीति तदव्याप्तिर्नियात तदभाववत्त्वरूपप्रतियोगित्वानिवेशोनुचित एव ननु पृथिवीध्वंसत्वादिमत्त्वसंयोगाभावस्य जलादिवृत्तित्ववि
शिष्टसंयोगाभावत्वेन एवीत्वाभावो व्यापकतया तत्र संयोगेतिव्याप्तिरिति यदभाववमात्रवृत्तिधर्मपुरस्कारेण साध्याभावो व्यापकत्वं वाच्यं तत्र जलादिवृत्तित्वविशि राम॰
ष्टत्वादेरव्यापकतानवच्छेदकतया नातिव्याप्तिस्तथा च ध्वंसत्वादिमत्त्वे कथमुक्तरीत्या लक्षणसमन्वय इति चेन्न एतन्मते साधनव्यापकस्याप्युपाधित्व

याद्रव्यत्वाभाववान्सत्वादित्यत्र साधनव्यापकस्य संयोगाभावस्यैव पृथिवी द्रव्यत्वादित्यत्र साधनव्यापकस्य संयोगस्याप्युपाधित्वे स्पष्टोपसाध्याभावमात्र
वृत्तीत्यादिविवक्षणाभावेन संयोगेऽव्याप्तेरीत्या लक्षणासमन्वयसंभवादिति व्याख्यायां तादात्म्येनेतिव्याचोक्तव्याप्तिलक्षणस्यैवेति भावः तादात्म्यस्येति न
चैवं जातिमान्सत्वादित्यादौ तादात्म्येन सत्तोपाधितानापत्तिरिति वाच्यं तत्र समवायेन सत्ताया एवोपाधितया तादात्म्येन सत्तोपाधित्वाभावे क्षतिविरहा
त् दीधितौ नव्यास्त्वेवं दंतीत्यनेनास्वरसोद्भावनं तद्बीजं तु लक्षणानां तु पर्यवसितेत्यादिमूलविरोधः किंचैतन्मतेऽगतिगौरवेणालाघवात् पदद्वयस्य त्वेनेति प्रागुक्ते
मेव सम्यक् न चैवं साधनव्यापकस्यानुपाधित्वापत्तिः विरुद्धस्येवेष्टापत्तेः अन्यथा धूमवान्वह्नेरित्यादावयःपिंडत्वादिविशिष्टत्वेन जलत्वाद्यभावस्यापि धू
माभाववद्व्याप्यत्वेन जलत्वादेरप्युपाधित्वस्यांगीकारापत्तेरिति शुद्धसाध्यव्यभिचारेत्तिस्याएव शुद्धसाध्यव्याप्तिधीविरोधितयापेक्षितत्वादिति भावः दी
धितौ सामान्यतः सामान्यधर्मावच्छिन्ननिरूपितव्याप्यत्वेनावधृतं निश्चितं लिंगमिति शेषः व्याख्यायां विशेष्यव्यभिचारित्वेनेति व्यापकतानवच्छेदकरूपे
णापीत्यादिः प्राचीनेति नैरितरबाधादिवशात् व्यापकतानवच्छेदकरूपेणाप्यनुमितित्स्वीकारादिति भावः साधनस्य साध्याभाववद्वृत्तित्वं यदि व्यभिचा
रस्तदा द्रव्यं विशिष्टसत्वादित्यादेरपि व्यभिचारित्वापत्तिरिति साधनवति साध्याभाव व्यभिचार इत्याशयेनाह साधनवतीति साधनतावच्छेदकावच्छिन्नवती
सर्थः साध्याभाव इति शुद्धसाध्याभाववेत्सर्थः व्यभिचारे इति शुद्धसाध्यव्यभिचारेत्सर्थः कथं निर्वाह्यमिति न च विशिष्टाभावस्यातिरिक्तत्वे साधनस्य साध्या

म०प्र०

भाववद्धृत्तित्वरूपव्यभिचारानुमानस्यापि विशिष्टसाध्यव्यापकेनानिर्वाहात्साधनवति साध्याभावानुमानरूपव्यभिचारानुमानपर्यंतानुधावनमफलमिति सूच्यं
विशिष्टाभावस्यातिरिक्तत्वेपि विशेष्यव्यभिचारादेर्विशिष्टव्यभिचारत्वरूपव्यापकतावच्छेदकावच्छिन्नत्वेनोक्तानिर्वाहासंभवात् व्यापकतावच्छेदकानवच्छिन्न
त्वादिति व्यापकतावच्छेदकानाक्रांतत्वादित्यर्थः व्यापकतानवच्छेदकरूपेणाभानांगीकर्त्तृप्राचीननयेपि व्यापकतावच्छेदकाक्रांतत्वं स्वव्यापकतानवच्छेदकरू
पेणाभानात्व्यापकतावच्छेदकाक्रांतैकविशेषबाधेतराक्रांतापरविशेषसिद्ध्या विशिष्टाभावस्यातिरिक्तत्वे च विशेषणविशेष्याभावयोस्तद्विशेषवत्वाभावेन विशेष्यसा
ध्याभावानुमानानिर्वाहादित्याशयः व्यापकतावच्छेदकप्रकारेणेवेति यावदिदमसंगतं हेत्वाभासबाधग्रंथे पक्षधर्मतौत्यसिद्धं वाधात्र सिध्यतीत्यत्र दीधितिकृता
चैत्रो जीवनमरणान्यतरवान् प्रतियोगी प्राणित्वादिसनुमाने व्यापकतानवच्छेदकजीवितत्वप्रकारेण साध्यानुमितेर्मणिकृन्मतसिद्धत्वेन प्रदर्शनीयतया तन्मतेनेत्यस्यासंग
तेः समानप्रकारकत्वेन विरोधितामते प्रमितिवर्त्तुरेकत्वे लाघवमिति लाघवज्ञानकालीनसकर्त्तृकत्वानुमितेः प्रमितिरेककर्तृकानवेति संशयानिवर्त्तकत्वानुरोधेन व्या
पकतानवच्छेदकप्रकारेणानुमितेरवश्यकत्वाच्च समानविषयकत्वेन विरोधित्वे च विशिष्टव्यभिचारत्वेन शुद्धसाध्यव्यभिचारसिद्धावपि प्रकारेणानुमितेरावश्यक य
त्वाच्च समानविषयकत्वेन विरोधित्वे च विशिष्टव्यभिचारत्वेन शुद्धसाध्यव्यभिचारसिद्धावपि प्रकृतव्याप्तिग्रहप्रतिबंधसंभवेन तादृशव्यापेणासिद्ध्यर्थं पद्रेसादिकत्वानुस
रणानुपपत्तेश्चेति नवीनानां दूषणोद्भावनं तदापातत एव रमणीयं दीधितिकृता हेत्वाभासे व्यापकतानवच्छेदकप्रकारेण साध्यानुमितिप्रदर्शनेपि तदनुमिते राम०

मणिकृन्मतसिद्धत्वस्याप्रदर्शनात् अतिरेकिग्रंथे अनुमितेर्व्यापकतावच्छेदकरूपेणोपव्यापकप्रकारकत्वस्य सर्वसिद्धत्वेनेति मणिकृतां कंठरवेणैवोक्तत्वात् तदर्शना
संभवाच्च द्वितीयदोषोप्यसंगतः मणिकृतासमानविषयकत्वेन विरोधित्वमंगीकृत्यैव बाधग्रंथे पक्षधर्मतावलात् असिद्धं न सिद्ध्यतीत्यादेरुक्तत्वात् नापि तृतीय
ः तादृशसिद्धेर्विशेषणाभावविषयिण्या अविरोधित्वेन विशेष्यसाध्याभावावगाहितासंपादनार्थं च हेत्वादिकृत्यानुसरणस्यावश्यकत्वात् न चैवमपि समानविषयक
त्वेन विरोधितायाविचारासहत्वात् कथमेतदिति वाच्यं एतदखरस्य स्वनायैव स्वमते नेतस्योक्तत्वात् विशिष्य पीतिव्यापकतावच्छेदकविशेषरूपेणापीत्यर्थः तथा वापेक्षि
ताया शुद्धसाध्यव्यभिचारसिद्धेरसिद्धिरेवेति भावः इति स्वमतमिति इदमुपलक्षणं विशिष्टाभावो तिरिक्त इति स्वमतमित्यपि द्रष्टव्यं तथा च साधनवति साध्याभा
वानुमानात्मकसाध्यव्यभिचारानुमानस्य विशिष्टसाध्यव्यापकेनानिर्वाहः एव विशिष्टाभावस्यातिरिक्ततया साधनवतितात्सिद्धावपि विशेष्याभावात्मकशुद्धसा
ध्याभावस्यासिद्धेरिति भावः मूले प्रसक्तस्य स्पर्शेत्यादि अत्र सर्वत्र प्रसक्तत्वं तौ किं कविषयतया प्रसक्तवत्त्वरूपं बोध्यं व्याख्यायां अप्रसक्तस्य तन्ने अप्रसक्तत्वा
दिटीकाकृन्मते दीधितौ प्रसक्तत्वांगीकारादिति तथा च योग्यमात्रवृत्तिगुणस्यैव योग्यतया टीकाकृतामात्मैकत्वपरिमाणयोरप्रसक्तत्वाभ्युपगमो संगतः एवेति भा
वः नन्वेवमप्यधर्मत्वात् वंशादेर्द्वित्वस्य प्रसक्तत्वेन परिमाणैकत्वयोरप्रसक्तता प्रसक्तसंख्यापरिमाणवत्त्वादेर्न द्रव्यप्रत्यक्षत्वव्यापकत्वं उपाधिशरीरनिवि
ष्टप्रसक्तस्य प्रसक्तोपहितत्वरूपत्वादत आह व्याख्यायां इदमुपलक्षणमिति वंशादौ द्वित्वपरिमाणस्य प्रह एवेत्यनेनान्वयः दूरत्वाद्वित्वप्रमेति दूरत्वप्र

युक्तइति तत्र प्रमेत्यर्थः दोषस्य त्वेचेति एकत्वस्य च ग्रहस्त्वेतमनेनान्वयः तद्वांतरेत्ति परिमाणैकत्वावांतरेत्यर्थः परं केवलं तत्र परिमाणादिग्रहस्य सं
दिग्धत्वादाह प्रत्यक्षस्वरूपयोग्यत्वेति तथाचोपाधिशरीरे प्रत्यक्षत्वं न प्रत्यक्षोपधानगर्भमिति न व्यभिचार इति भावः अग्रे इति इदमुपलक्षणं पूर्वमित्यपि द्रष्ट
व्यं नन्वेवं वायुः प्रत्यक्ष इति व्याप्यानुमाने बहिरिंद्रियप्रत्यक्षत्वव्यभिचारानुमाने ऽर्थांतरापत्तिरित्यत आह एतत्त्वे चेति अनेकत्वसाध्ये हेतौ च सं
कोचेति सामान्ये पदस्याविशेषपरत्वे इत्यर्थः कुसुमनाभ्यात् कुसुमनारूपगौरवभयात् अरविंदप्रत्यक्षपदस्य बहिरिंद्रियप्रत्यक्षपरत्वे ऽरविंदे द्रव्यपदे
वेतीति न चैतत्त्वेपि महत्त्वपरस्य लाक्षणिकतया परत्रयलक्षणायान पूर्वकल्पात्लाघवमिति वाच्यं एवं कल्पे मनो भिन्नेंद्रियजन्यप्रत्यक्षत्वेन गुरु
येण लक्षणांगीकारेण पूर्वकल्पस्य गुरुतया अत्र कल्पे लघुरूपेणान्मानद्रव्यत्वेन लक्षणाकल्पनमिति लाघवसंभवात् चक्षुरादीति जन्यमहत्त्वेने
त्यादि तत्परत्वं महत्त्वेन चक्षुरादिनिष्ठमहत्त्वविशेषपरत्वं अंतर्गडुना मध्यस्थेन व्याप्यपदमिति दृष्टांतार्थं अव्यभिचारित्वपदं चेति प्रकृतामिप्राये णा
बहिर्द्रव्यत्वाव्यभिचारित्वाभावेनेति आत्ममहत्त्वे व्यभिचारादिति भावः तत्सामानाधिकरण्येनेति वह्निधूमव्यभिचारीत्यादि प्रयोगानुपपत्त्या व्यभिचारित्वपद
स्यान्वयितावच्छेदकसामानाधिकरण्येनैव स्वार्थान्वयबोधकत्वादिति भावः तेन रूपेणा जन्यमहत्त्वत्वरूपेणा तथा व्याख्यातं महत्त्वपदं जन्यमहत्त्वपरतया राम०
व्याख्यातं यत्तत्र सति सप्तम्यर्थ सामानाधिकरण्य विशेषणान्वये च बहिर्द्रव्यत्वाव्यभिचारस्य वयोन तु महत्त्वविशेषणतयेति तत्सामानाधिकरण्यवि

शिष्टोद्भूतरूपव्यभिचारस्तैर्महत्त्वत्वसामानाधिकरण्येनान्वयात्गगनादिमहत्त्वमेव महत्त्वत्वेन दृष्टान्त इति लक्षणया महत्त्वपदस्य जन्यमहत्त्वपरत्वमनुचितमि
ति नवीनैर्दूषणमुद्भावितं तदेवानो विमपदवीमारोहति इत्थं च व्यभिचारित्वे सति यत्किसमानाधिकरणमिति प्रयोगापत्तिवारणाय सति सप्तमीसमभिव्याहृत
स्याप्यव्यभिचारित्वपदस्यान्वयितावच्छेदकावच्छेदेन पारतंत्र्येणाख्यार्थान्वयबोधकत्वस्यावश्योपेयत्वतया महत्त्वपदस्य लक्षणया जन्यमहत्त्वपरत्वस्यावश्य
कत्वात् यदपि सर्वत्र पक्षतावच्छेदकविशिष्टसाध्यसाधनं च यद्विशिष्टहेतुस्तद्विशिष्टसाध्यमिति व्याप्त्यैव गंधप्रागभावादिविशिष्टगंधानुमानस्य सल्लिंग
तानभ्युपगमात् उक्तव्याप्तिश्च यद्विशिष्टस्य दृष्टान्तता तद्विशिष्टस्य साध्यसाधनोभयवत्त्वादेव निर्वहति एवं च हि ईदृग्व्यत्वाभाववद्वृत्तितावच्छेदकस्य महत्त्वत्वस्य
तदभावानुयोगितानवच्छेदकतया तद्विशिष्टत्वेन न वहि ईदृग्व्यत्वाव्यभिचार इति तद्घटितसाधनविकलत्वतया दीधितिकृतो जन्यमहत्त्वविशिष्टस्य दृष्टान्तता
नुसरणमिति नवीनैरुक्तं तदपि चिंत्यमेव गंधप्रागभावादिविशिष्टगंधानुमानस्य सल्लिंगतानभ्युपगमे यदि च सल्लिंगपरामर्षादिविभ्रांतानुमितिरित्यनु
मितिलक्षणाया दीधितिग्रंथविरोधापत्तेरितिलक्षणायावेशेन द्वित्वाद्यवच्छिन्नाभावं द्वित्वाद्यवच्छिन्नव्यापकप्रतियोगिताकं साध्यस्य प्रत्यक्षत्वस्य फलोपधान
गर्भतद्घटत्वादेः साध्यसमस्येवेत्यत आह तद्घटत्वादीति व्यापकतावच्छिन्नेति व्यापकतावच्छेदकावच्छिन्नेत्यर्थः असिद्धिः हेत्वसिद्धिरुद्याधितादौ घटकसंबंधेन ता
दृशाभावस्य वा यावत्सत्त्वानां तादृशाभाववत्तिसामान्याभावो प्रत्यक्षस्यस्पर्शाश्रयत्वस्याद्रव्यत्वादिति भावः असिद्धिमेव विवृणोति समानादेरिति तद्व्यापकत्वात् तद्व्यापक

१७

भा० प्र०

तावच्छेदकावच्छिन्नत्वात् दीधितौ व्यापकतावच्छेदकेति व्यापकतावच्छेदकत्वोपलक्षितेत्यर्थः व्याख्यायां । तादृशेति । एवं चेत्यादि व्यापकतावच्छेदकव्यापकता
वच्छेदकत्वोपलक्षितं प्रमेयत्वेति पृथुबुध्नसमत्वेति पृथुबुध्नसमत्वेत्यर्थः आप्यत्वेति प्रमेयत्वव्यापकव्यभिचारस्य तदासंदिग्धासिद्धेः स्यादितिसंदिग्धासिद्धि
मात्रवारकत्वादिति भावः एवं द्रव्यपदसांगेसमंतस्यापि वैयर्थ्यं बोध्यं प्रमेयत्वेत्यिगुणत्वाद्यवच्छिन्ने रिसादि द्रव्यमसमत्वेति गुणत्वादिवच्छिन्ने रिसादिवच्छिन्ने रिस्या
दिव्यतिरिक्तत्वादिति तथा चोत्तरांशभावघटकतया न वैयर्थ्यमिति भावः प्रदिष्टत्वाभावेनेति व्यापकतावच्छेदकत्वस्योपलक्षणात् तथैव निवेशादिति भावः तज्ज्ञाने
च उद्भूतरूपत्वादेर्ज्ञाने च तथैव उद्भूतरूपादिव्यभिचारत्वेनैव व्यापकतावच्छेदकत्वस्योपलक्षणात् तथापि निवेशप्रयोजनाभावादिति भावः उचितमिति इति द्रव्य
पदवैयर्थ्यशंकैवनेति शेषः दीधितौ द्रव्यत्वेति वह्निईयत्वेत्यर्थः नात्मत्वे व्यभिचारः ननु एवं सत्वे व्यापकत्वोपन्यासवैयर्थ्यमत आह व्यापकत्वोपन्यास
स्त्विति तर्कप्रदर्शनायेति उद्भूतरूपत्वं यदि प्रमेयत्वव्यभिचारव्याप्यतादृशविशेषणाविशिष्टव्यभिचारप्रतियोगितावच्छेदकं न स्यात्तदा वह्निईयतावच्छेद
च्छिन्नसाध्यव्यापकतावच्छेदकं न स्यादिति व्याप्तिग्राहकतर्कजनकापाद्यव्यतिरेकनिर्णायकप्रदर्शनायेत्यर्थः व्याख्यायां एतत्सरत्वभ्रममिति तन्मूलस्येतस
रत्वे विशेष्यवैयर्थ्यमिति भावः न चाव्यभिचारत्वमादेवद्रव्यमात्ररीसार्थानुसरणे वह्निईयत्वसमानाधिकरणत्वे सति उद्भूतरूपव्यभिचारित्वस्य हेतुत्वलाभा
नोक्तदोष इति वाच्यं तथा सति प्रमेयत्वादौ व्यभिचारापत्तावाया उद्भूतरूपव्यभिचारित्वस्यैव हेतुत्वलाभस्य वाच्यतया विशेष्यवैयर्थ्यस्य दुर्वारत्वात् व्यक्ततस्मि

राम०

मातनयत्वपक्षकानुमाने ऽघटत्ववदितिदृष्टांतानुरोधेनाव्यभिचारपदस्य यथाश्रुतार्थसांगेपि पक्षस्य स्पर्शाश्रयत्वपक्षकानुमाने ऽव्यभिचारपदस्य यथाश्रुतार्थ
कत्वमेव सम्यक् यथाश्रुतार्थस्यैव सम्यक्त्वे तत्सांगानौचित्यादित्याशयेनैव दीधितौ ऽव्यभिचारइत्साधुक्तमिति ध्येयं वक्ष्यमाणात्वादिति मूले हेतौ श्या
दि व्यभिचारेति श्यामत्वस्य भिचारे समर्थः हेतौ श्याममित्रातनयत्वव्यापकत्वघटितहेतौ दीधितौ प्रमाणांतरेणापूर्वेहादिना मूले श्याममित्रातनयत्वव्याप
केति मित्रातनयत्वावच्छिन्नश्यामत्वव्यापके समर्थः दीधितौ शेषेति विशेष्ये समर्थः श्याम औतनयत्वादौ मित्रातनयत्वव्यापकत्वाभावेन समंताभावादेवाँभि व्य
चारादिति भावः दृष्टमिति त्वमेवेति दृष्टमित्वे शाकपाकजत्वाभाववद्वृत्तित्वस्यापि सत्वेन यन्निष्ठेत्यादिना यानवतारादिति भावः एवकारेण शाकपाकज मि
त्वाभाववन्निरूपितत्वविशेषणमवच्छेदः यत्किंचिदिति मित्रातनयत्वपक्षेत्यादितत्समानाधिकरणमात्रस्यैव तादृशत्वेन लाघवान्नादृशस्य भत्सामानाधिकर
णपर्यवसानमित्याशयेनाह फलतइति सामानाधिकरण्यपर्यवसितस्य मित्रातनयत्वसामानाधिकरण्यपर्यवसितस्य मित्रातनयत्वव्यापकत्वस्येति शे
षः ऽक्तत्वात् मित्रातनयत्वाव्यभिचारित्वपदेन लक्षणया प्रतिपादितत्वात् एवंच तद्वीजनकधीविषयत्वरूपशाब्दसंबंधप्रदर्शनायैव यत्किंचित्स्वरूपसंक्षेपइत्याशयः
तथाच श्याममित्रातनयत्वादेरपि तादृशत्वात्तत्र व्यभिचारणायविशेष्यदलसार्थकमिति भावः आख्यायां यत् तदर्थयोरिति। यत्त्वतत्वाननुगमेन तत्रेमत्वविशिष्ट
मित्रातनयोयासन्ने पूर्वदलवैयर्थ्यमित्याशयः मित्रातनये मित्रातर्माविन दीधितौ श्यामत्वादाविति नियतत्वश्यामत्वं श्यामरूपमेव तथाच यत्र श्यामरूपे शाकपा

कजत्वव्यभिचारोस्ति तत्र न मित्रातनयत्वसामानाधिकरण्यं यत्र च श्यामरूपे मित्रातनयत्वसामानाधिकरण्यं तत्र न शाकपाकजत्वव्यभिचार इति कु
त्रापि श्यामरूपे हेतोरसत्त्वेन श्यामत्वे व्यभिचारप्रसक्तिरेव नास्तीति तत्र एतद्दूषणरसादेव काकश्यामपि मित्रातनयत्वं निद्धित्वाद्युपसंग्रहकादिपदोपादा
नात् अत्र कुरणसंविज्ञानबहुव्रीहिणा श्यामत्वाद्यावृत्तिमनेनतादृशद्वित्वपरिग्रह इत्यपि केचित् एवं काएवहिनीला रूणादिव्याप्य इत्याशयेनेदमित्यपरे
परंपरया दुष्यगतं साक्षाद्वा नीलरूपगतं जातान्यकमेव श्यामत्वमात्रविवक्षितमित्यपि कश्चित् व्याख्यायां दृष्टांतासिद्धीति। अघटत्वस्य मित्रातनयत्वव्याप्य
त्वादिति भावः यथाश्रुतेति। व्याप्यत्वात्मके सपर्थः फलांतरं। श्यामत्वादौ व्यभिचारवारणरूपफलभिन्नफलं आह। किंच गुणावयो कनमायेनेत्यादिनेत्यैकफलसमभि
व्याहृत्ये मतांतराभिधाने संदर्भविरोध इत्याशंकायां अन्वकाशः केचित्तु आहुरित्यनेन सूचितमस्वरसं प्रकटयन्ति मेयत्वादावपीतितव्याचोपदर्शितरीत्या विशेष
णाव्यभिचारित्वस्य विशेषणाव्याप्यत्वार्थकरणे वा पुनः प्रमेयत्वादिसाद्यप्रमेयत्वं प्रत्यक्षत्वव्यभिचारिविहिर्ईश्वत्वव्याप्यत्वे सन्निवर्हिर्द्व्यत्वविशिष्टप्रमस्तत्व
व्यापकव्यभिचारित्वादित्यनेनव्यभिचारानुमानं न संभवति हेतोः स्वरूपासिद्धत्वादिति भावः स्माहुः नवीनास्तु यथाश्रुतव्यभिचारं निवेशे गौरमित्रातनयत्वादिकमेव
स्वलक्षणाकुतो न दृष्टांतीकृतमित्याशंकां निराकरोति मेयत्वादावपीति स्पष्टं पशाकपाकजत्वव्यभिचारस्तत्त्वादिति भाव इति शाहुः इत्थं क्रमेण विशेषणसमभिचा
रित्वेन ज्ञानेत्याद्युक्तक्रमेणादीधितौ समर्थ्य उपपाद्य व्याख्यायां किंचिद्विशिष्टेनेति विशेषणाव्यभिचारित्वादिविशेषणाविशिष्टेन सर्थः दीधितौ। साधारणेति। राम०

२ यंतस्य विशेषणावत्ती सर्थकरणादेवेत्यादिसप्रमाणमेयत्वादिसत्प्रमेयत्वस्य मित्रातनयत्वाव्यभिचारित्वाभावे पि मित्रातं२

तदुभयवृत्तियोग्यतावच्छिन्नेत्यर्थः योग्यतात्वमुभयसाधारणमेकमस्तीत्याशयः अव्यवस्थापयति एवोक्तलक्षणतावच्छेदकमनुपपन्नं स्यादिति व्याख्यायां शाङ्क
रीत्येति दूष्यं तेजस्त्वाभाववत् शीतस्पर्शाज्जलत्वादिति रीत्येत्यर्थः व्यभिचारोन्नापकस्पर्शाभावादीनामसंभवपरिग्रहः तथा च पूर्ववदिति विरुद्धविशेषणमिति भा
वः साधनविशिष्टेति द्वितीयव्यभिचारपदार्थेनान्वितं तेनोपाधिशरीरस्थानत्वेन साधने साध्यव्यभिचारभानापत्तिः वैयर्थ्यमिति साधनव्यापकस्य च स्वमारारूपवत्त्वा
देर्निरुक्तव्यभिचारोन्नापकत्वाभावादेव वारणादिति भावः यद्बुद्धीहिरा तिवद्बुद्धीहिणा साधने यदभाववृत्तित्वरूपव्यभिचारबोधने तुल्यावित्तिवेद्यत यासाधन
वद्भ्यभावप्रतियोगित्वस्यापि यसदार्थेत्वाभादिति भावः जलभिन्नइतीति अवच्छिन्नसाध्यव्यापकसंग्रहाय विशेषितानि विशेषितसाधारणेन व्यभिचारोन्नाय
कत्वस्य बाधत्वादिति भावः न गुरुत्वेतिरसस्यैव व्यभिचारादिति भावः साधनविशेष्यकेत्यादि तथा च शब्दमात्रं विलक्षणानर्थं वैलक्षण्ये एवं चोक्तिभ्यां यापर्व
स्यैवानुवादो यन्न तु लक्ष्यतावच्छेदकमुत्तरमिदं न चैवं कल्पद्वयाभेद इति वाच्यं विशिष्टसाध्यव्यापकोपाधौ साक्षात्साध्यव्यभिचारोन्नापकत्वेन लक्ष्यतावच्छेदक
मुपपादितं एवं कल्पे यद्वा कल्पे तु तत्र परंपरया साध्यव्यभिचारोन्नापकत्वेन लक्ष्यतावच्छेदकमुपपादितमिति कल्पद्वयभेदोपपादनादित्याशयः केचित्तु उक्ति
वैचित्र्यादिति उक्तिविचित्रार्थकत्वादित्यर्थः पः साधनव्यभिचारीत्यादि यावत्स्वसाधनाधिकरणाभिन्न यद्धर्मावच्छिन्नाभावाधिकरणयत्किंचिद्वृत्तित्वं साध्य
व्यभिचारव्याप्यं तत्त्वमित्यर्थकत्वादित्याद्यावत् तथा च पूर्वकल्पे यद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचि विद्वृत्तित्वे साधनवृत्तित्वं विशेषणं अत्र कल्पे तु यद्धर्मा

१८

म०प्र० वह्निनाभावाधिकरणे साधनाधिकरणत्वं विशेषणशेषणामितिद्विशेषणाभेदात्पूर्वोक्तलक्षणतावच्छेदकादेतल्लक्षणतावच्छेदकस्य भेदो बोध्य इत्याहुः पूर्वक
ल्पादेतत्कल्पस्य प्रकारान्तरेणाभेदमुपपादयतः सार्वभौमस्य मतमाह दीधितौ केचित्त्विति मात्रेणेति। तृतीयाभेदे मात्रपदव्यवच्छेद्यमाह व्याख्यायांनत्विति
सहेत्वादिस्थले तं हृदरूकामात्रवृत्तिधूमव्यभिचारवारणाय गगनादौ व्यभिचारवारणाय विशेष्यं प्रमेयत्वादिनेति न च जलत्वादिनाव्यापकत्वविवक्षणात्तत्र व्य
भिचार इति वाच्यं तथा सति जलत्वादेरेवव्याप्यत्वसंभवे शेषवैयर्थ्यंनस्येहस्यव्याप्यतावच्छेदककोटिप्रविष्टतया तत्रातिव्याप्त्यसंगतेः पर्याप्तं तेनेति तत्स्वरू
पादरूपेण साधननाभाववद्वृत्तित्वात्मकेत्यर्थः वह्न्यादीत्याश्रयणात् फलं स्फुटयति द्रव्यत्वइतिदीधितौ शाद्यादेरिति इदमुपलक्षणं धूमवान्वह्नेरित्यादौ वह्निर्धू
मव्यभिचारी अयोगोलकवृत्तित्वादित्यादिना व्यभिचारोन्नायकस्यायोगोलकत्वादेर्घटो घटत्वादित्यादौ घटो घटत्वव्यभिचारी कपालसमवेतत्वादित्यादिना व्य
ख्या भिचारोन्नायकस्य कपालत्वादेश्चवारणाय तस्य पि दूषकत्वं मौयां व्याप्यकोटी इति तत्र शीतस्पर्शवद्वृत्तित्वादेरेवव्याप्यत्वादिति भावः तत्र तेजो द्रव्यत्वादित्यनुमाने सं
बंधान्तरेण कालिकादिसंबंधेन न क्षतिः नातिप्रसंगः साधनाव्यापकस्येति। सपक्षैकदेशवृत्तिधर्मस्येति शेषः परं केवलं प्रकृतसाधने इति सप्तम्यर्थो विशे
ष्यकत्वमनुमितिस्त्वितंव्याप्यतावच्छेदककोटिप्रविष्टत्वं स्वाविषयकवतीत्यविषयतत्कत्वं यद्वा यथा कथंचित्त्संबंधित्वमेव तत्प्रविष्टत्वं प्रयोजकासंभवा राम०
त्जनकतावच्छेदकस्यासंभवात्तादृशधर्मेति प्राक्तु सपक्षैकदेशवृत्तिधर्मे सर्थः न चैवं साधनविष्टसाध्यव्यभिचारसंबंधित्वमेवास्तु लाघवादिहतं

व्याप्यत्वविशेषणेनेतिवाच्यं यथासंनिवेशेनावैयर्थ्यात् तथासति उपाधिशरीरस्थानएवसाधनेसाध्यव्यभिचारभानापत्तेश्च निराकरोतीति वक्ष्यमाणा
दिवस्यपेत्यादिवारणायेति अत्र संयोगत्वेन स्पर्शवारणामिति तथा च रूपवान् द्रव्यत्वादित्यत्र साधनाव्यापकत्वसाध्यव्यभिचारयोरेकाधिकरणाव
च्छिन्नत्वाभावेन पृथिवीत्वाभावेऽव्याप्तिरिति भावः दीधितौ यथाकथंचिदिति विशेषिताद्विशेषिसाधारणपेने मर्षः व्याख्यापां तत्र रूपवान् द्रव्यत्वा
दित्यत्र द्रव्यत्वस्येति हेतोरिति शेषः ऐक्यादिति तथा च द्रव्यत्वरूपसाधनव्यापकत्वस्य पृथिव्यवच्छेदेन सत्वात् तच्छेदकोद्रव्यत्वे बाधायवच्छेदेनैव रूपा
द्व्यभिचारोव्यापकत्वस्य सत्वात् पृथिवीत्वाभावादौ लक्षणासमन्वय इति भावः इह गुरुरूपादित्यत्र भेदादिति तथा च तत्र पृथिवीत्वाभावे पृथिवीरूपात्म
कसाधनाव्यापकत्वस्य सत्वेन तच्छेदकौ पृथिवीरूपे गुरुत्वव्यभिचारस्यासत्वेन तद्व्यापकताभावात्तत्रातिव्याप्तिरिति भावः अभाववत्स्य अयोगोलकत्वाभा
वादेः वैयर्थ्येनेति वह्निधूमव्यभिचारी अयोगोलकत्वाभावाभाववद्वृत्तित्वादित्यत्र अयोगोलकवृत्तित्वस्यैव सम्यक्त्वादिति भावः तस्य अयोगोलकत्वाभावादेः अभावे
शादिति न च वह्निधूमव्यभिचारी अयोगोलकत्वाभाववत् तद्वृत्त्यन्तरत्वादित्यत्र धूमव्यभिचारव्याप्यतावच्छेदकम् अयोगोलकत्वाभाववत्तद्वृत्त्यन्तरत्वं तत्र विशिष्टस्य
योगोलकत्वाभाववत्सामीति वाच्यं तादृशान्तरत्वस्य अयोगोलकत्वाभाववत्तद्वृत्तित्वात्मकतया तद्वृत्तित्वादिस्यैव सम्यक्त्वेन तत्र विशिष्टत्वाभावात् केचित्तु साधन
वद्भिन्नसाध्याभाववत्तियोगित्वं साध्याभाववत् अन्तर्भूतं सत्वेनास्य साधनाव्यापकत्वं साध्याभाववद्भिन्नं तत्त्वेनांशस्य च लक्षणस्यासामंजस्ये शेषवैयर्थ्यमेवाभास

भा·प्र·

स्यस्वाकुलग्निंसंपत्यासंनिवेशे द्वैपत्याभात् दीधितौ पारिभाषिकं उपाधिपदसंकेतविषयः साक्षादिति परं परम्पराव्यभिचारोन्नायकस्य दोषत्वे उपाध्युन्नायकं परं
परायाऽपि दोषतापत्तेरित्याशयः दोषत्वाभावेनेति प्रथममनाकांक्षितत्वादिति शेषः तदुद्भावनेऽवच्छिन्नसाध्यव्यापकोपाध्युद्भावने व्याख्यायमाना
स्तीति तदानीमप्यनुमानदूषकत्वरूपदोषत्वेनाकांक्षासत्त्वेनानाकांक्षितत्वाभावादिति भावः मूले दोषः अनुमानदूषकत्वेनोद्भाव्यः स्वः एवमस्मादृश
मुपाध्युद्भावनप्रकारमादर्शयितुं प्राचीनसंमतं तत्प्रकारं दूषयन्नाह दीधिनाव अवदंतीति उपाधेरिति इदं च व्यभिचारादेर्व्याप्यतावच्छेदकसंबंधत्वमस्ती
सा[illegible]श्येन तत्स्वतत्वानंगीकारे तूपाधेरित्संतत्स्वतादृशोपाधिव्यभिचारस्येत्यर्थः उद्भावन इति प्रथममित्यादि अप्राप्तकालत्वमिति सर्वथाकांक्षाभावासत्वेनापर्यंतराभावे
पितदानीमनाकांक्षिततयाऽप्राप्तकालत्वमस्त्येवेति भाव केवलव्याविपरीतव्यापा यद्वा केवलवेत्यस्य स्फुटतराभिसर्घः व्याख्यायां उद्भावन इतीति यद्वा केवलस्येउद्भावनइ
त्यादीत्यर्थः तेनोद्भावनेऽप्राप्तकालत्वमित्यस्य लाभः दीधितौ विशेष इति उपाधेरित्यादि व्याख्यायां तत्तःतत्साधकपरंपरातः दीधितौ हेत्वाभासाद्वेति न च हेत्वाभासा
नां प्रतिज्ञाहान्यादिमध्ये परिगणिततत्पापपृथ्युपन्यासो व्यर्थ इतिवाच्यं व्याप्तेरेनोपाधिकत्वमते उपाधेर्व्याप्यत्वासिद्धित्वेन हेत्वाभासांतर्भावशंकायां आभेर
नोपाधिकत्वनिरासेन तच्छंकानिरासार्थकतयात द्वैयर्थ्याभावात् न वा हि भूतस्येति उपाधेरितिशेषः व्याख्यायां स्वतंत्रोपांतस्वतंत्रेतेनउपात्तस्वत्रस्य वकारस्येनुगो राम०
समुच्चयपरत्वकथनेन अपाकृतं निरस्तं तत्प्रकारमेवाहतत्रेति पयोक्तत्वस्यैव यालक्षणालक्षिततरूप पर्याप्तत्वस्यैव नियहस्थानत्वमेवेति उपात्तस्वत्रे हेत्वा

भासानां घटकतयाते केइत्याकांक्षयाचरमसूत्रस्य प्रवृत्तत्वेन तत्सूत्रस्य यथोक्तत्वविधायकत्वेन निग्रहस्थानत्वस्य विधेयत्वासंभवेन निग्रहस्थानत्वविधा
यकोपात्तसूत्रस्य चकारस्यैव दृष्टांताभासाद्यनुक्तसमुच्चयपरत्वमुचितमित्यास्तां उक्तार्थः॥ अत्र प्रसंगादुपकारकत्वाच्च संक्षेपतः सूत्रव्याख्या क्रियते तत्र स्वीकृ
तस्योक्तपरित्यागः प्रतिज्ञाहानिः न च दृष्टांतसंवरणेन निग्रहस्थानेऽतिव्याप्तिरिति वाच्यं दृष्टांतसंवरणाभावे सतीत्यनेनैव विशेषणात् न चापसिद्धांते तिप्रसंगः अप
सिद्धांतस्य स्वपक्षमनुक्तत्वात् प्रतिज्ञातार्थे दूषिते तद्दूषणनिरासेच्छया विशेषणांतरप्रक्षेपेण प्रतिज्ञातार्थस्य पुनः कथनं प्रतिज्ञांतरं कथायां स्ववचनार्थ
विरोधः प्रतिज्ञाविरोधः स्वाभिहितपक्षे परेण दूषिते तद्दूषणपरिहारेच्छया प्रतिज्ञातार्थस्यापलापः प्रतिज्ञासंन्यासः स्वोक्तहेतौ परोक्तदूषणोद्धारेच्छया पूर्वोक्त
हेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनं हेत्वंतरं प्रकृतानाकांक्षिताभिधानमर्थांतरं अवाचकपदप्रयोगो निरर्थकं अवाचकत्वमनादि
सिद्धशक्तिमत्त्वं तेन गंगापदस्य तीरादौ प्रयोगेन दोषः अव्यवहितादिकलक्षणमत्र परिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगोऽविज्ञा
तार्थः वाचकत्वेन निरर्थकापार्थकयोर्वारणं अभिमतवाक्यार्थबोधानुकूलाकांक्षादिशून्यबोधजनकपदमपार्थकं तत्कालेऽनाकांक्षिताभिधानमप्राप्त
कालं स्वसिद्धांतसिद्धावयवेषु न्यूनाभिधानं न्यूनं हूतकर्त्रानुपयुक्ताभिधानमधिकं अनुवादभिन्नशब्दार्थयोः पुनर्वचनं पुनरुक्तं निरुक्तस्याप्यननुवादो
ननुभाषणं उत्तरास्फूर्तिरप्रतिभा कार्यव्यासंगमुद्भाव्य कथाविच्छेदो विक्षेपः स्वपक्षे दत्तदोषमनुद्धृत्य परपक्षे दोषाभिधानं मतानुज्ञा पर्यनुयोज्यस्य निग्र

भा॰प्र॰ हस्तानं प्राप्तवतः उपेक्षणां निग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणां निग्रहस्थानोद्भावनावसरेपि तस्यानुद्भावनमिति पर्यवसितार्थः। निग्रहस्थानानवसरे निग्रहस्था
नोद्भावनं निरनुयोज्यानुयोगः। परिगृहीतसिद्धांतविरुद्धाभ्युपगमोपसिद्धांतः। सव्यभिचारादयो हेत्वाभासाः। अथ च स्त्वर्थे तेन एतानि तु निग्रहस्थानानि न पुनरथ स्था
पाद्दिनाननुभाषणादिकमित्यर्थो लभ्यत इति भावः। चकारोनुक्तसमुच्चयेतेन दृष्टांतेसाधनवैकल्यादीनां परिग्रह इति नव्याः। अखंडीनां कारेणापराहंकाररवं इनं निग्र
नि हस्सये त्रुतिष्ठतितानि निग्रहस्थानानि निग्रहोन्नायकानीत्यर्थः। अत्र कथकोद्देश्यकथाफलप्रयोजककथाहेतुपथार्थज्ञानविरहतापकत्वं निग्रहस्थानसामान्यल
क्षणां न च यत्र प्रवृत्तविषयपथार्थज्ञानवतोपि सभाक्षोभादिनाऽननुभाषणं तत्राव्याप्तिरिवाच्यं फलोपधायकत्वरूपप्रयोजकत्वविवक्षणेनतत्रापि कथाफलोपधा
यकज्ञानाभावसत्वादिति इत्यत्रएतद्दूटकीकृतोन्नपनेयव्यभिचारोन्नायकमिति एवं च दीधितौ तदुभयोन्नायके सत्ये कर्म्मधारयः। अन्नायकोभयपरंपरायाइत्यर्थ
इति ध्येयं निग्रहस्थानत्वाभावादितित्याचोपाधेरिवता दशापरायाअपि दोषोन्नायकत्वेनानुक्तसमुच्चयपरेणाचकारेण संग्रहेतस्याः प्रथमसमुद्भावनेऽप्राप्तकालत्वं
न स्यादिति भावः। संप्रदायपर्यवहार परमिसाशयेन व्याचष्टे कथकानामिति परायवतः। निग्रहूतः तल्लिंगम्पाधिर्नोद्भाव्य एवेत्यन आह दीधितौ तस्मादिति व्यभिचारय
वेमेवकस्यत्वव छेद्य मा ह व्याख्यांनत्विति प्रत्युत्तसाध्येति प्रद्धसाध्ये सर्थः। आकांक्षायां प्रमाणजिज्ञासायां दीधितौ प्रमुद्धसाधव्यापकेसादृश्यमानं तत्र प्रमुद्ध राम॰
प्रतिपूर्वे रागाद्व यिव्याख्यापांविशेषणोतीति तत्रकर्यंता नांतहेतसेनेनमनुषमनेशपामताद्दोषव्यभिचारेणाकेवलसविशिष्टसाध्यव्यापको पाधिव्यभिचारसमुद्धसाध्य

व्यभिचारानुमापकत्वासंभवेन विशेषणोत्सादिसमर्तंतोपादानविमाशयः दीधितावनुपेक्षेरिति व्यभिचारस्याग्रिमेणान्वयः व्याख्यायां परंपरया विशिष्टसाध्य
व्यभिचारानुमानद्वारा। व्यभिचारानुमापकत्वेविति। शुद्धसाध्यव्यभिचारानुमापकत्वेविति अर्थः आह विशिष्टेत्याद्यः अत्रापि समंतमनुषज्यते केवलविशिष्टसाध्य
व्यभिचारस्य स्वरूपासत्त्वात् तद्व्यभिचारेणाशुद्धसाध्यव्यभिचारानुमापकत्वासंभवादित्याशयेनाह अत्र विशेषणेति समर्थितो भवतीति हेत्वाभासत्वे न प्रयमो
पमासेऽसमासकालत्वाभावादिति भावः दीधितौ व्यात्याहीति साध्यसाहित्यादित्याख्यापावह्निविहुमेति मत्वानसत्वाहीमर्थः कथंचिदिति अनुकूलतर्कादिनेत्यर्थ
ःअन्येन संदिग्धोपाधिरपि सइत्यत्र शंकनीयत्वादिति मूलकारस्योसारिश्रसा। एतद्ग्रंथस्य। दीधितौ तस्येति पर्वतेतरत्वस्येत्यर्थः व्याख्यायां साध्यव्यापकेनेव
ह्निव्यभिचारित्वव्याप्यपर्वतेतरत्वव्यभिचारित्वाव्यापकत्वेनेत्यर्थः उपाधेः धूमेतरत्वस्य साध्यव्यापकत्वेति वह्निव्यभिचारित्वाव्यापकत्वेत्यर्थः नअद्व्यइति तथा च निर्दु
ष्टिकक्षसंप्रदानरोधे पक्षेतरोव्यापकं उवरिमेवेति भावः उपाधितौपयिके ति। एवं च विशेषणागतताद्रशनाशस्यबोधानुरोधेन विशेषणावत्त्वादिति मत्तुव
प्युपपत्तेः असमथानकर्मधारयादिति निषेधेन तदनुपपत्तेः एतन्मतं – पंचलक्षणामुपपादितं तत्तुल्यत्वादिति तथा च मत्वाभिप्राय एव दीधितिकृता कृतिसाधि
नावलीति ह्याशयः इत्यर्थ इति विशेषणावत्त्वादिति मूलार्थं आहुरिति अरुचि सैवोपपत्तौ बहुव्रीह्यनुसरणाभावात्तेनुक्तितः किंचभावप्रत्ययस्य प्रकृत्यर्थतावच्छे
दकवाचकत्वात्तावतिप्रभयसबलाद्यवाससाहस्यवाचकत्वे तेन साहस्यासाभत्वा इत्यस्वरसः दीधितौ न बीजमिति वह्नीतरत्वादे [redacted] पनुपाधितापत्तेरिति भावः प

२२

पक्षादिघटितत्वे हेतुव्यापकतायाः दुर्ग्रहत्वादिति भावः साध्यव्यापकत्वानिश्चय इतिन्ननुपाधितायां बीजमित्यनुषज्यते ।१

भा०प्र० रिमात्रत्वादिति तादृशविशेषणावत्त्वेपि साध्यव्याप्यत्वाख्यायां असंगतिरिति व्यापकताग्राहकानुकूलतर्काभावे साध्यव्यापकत्वानिश्चयेनार्द्रेंधनप्रभववह्निम
त्त्वादीनामुपाधितोन्नेरसंभवादित्याशयः दीधितौ प्रमाणेति प्रमाणासहकारितर्केत्यर्थः कारणतावगमेनेति मूलस्योपाधितावच्छेदकार्द्रेंधनप्रभववह्नित्वेन कार
णतानिश्चयेनेत्यर्थः तस्य कारणतानवच्छेदकत्वे धूमव्यापकतावच्छेदकत्वं तद्रूपविशिष्टव्यभिचारेण साध्यव्यभिचारानुमानं चानुपपन्नमित्याशयः इत्यभिप्रायेणाश
ङ्कते अथेति व्याख्यायां प्रसक्तिः कारणतावच्छेदकसंबंधः तथा च संयोगेन धूमं प्रति संयोगसंबंधेन वह्नित्वार्द्रेंधनत्वाभ्यां हेतुतेति भावः आर्द्रत्वं च जलसंयो
गवत्त्वं इंधनत्वं च पृथिवीत्वं अतो नेंधनारंभकावयवानुपपत्तिः नन्वेवं परस्परासंयुक्तार्द्रेंधनवह्न्योः सत्त्वे धूमापत्तिरत आह परस्परप्रत्यासन्नानामिति कारणता
तावच्छेदकसंबंधेन परस्परसंबद्धानामित्यर्थः तथा चार्द्रेंधनसंयुक्तवह्नेरेव फलोपधायकत्वाभ्युपगमान्नोक्तापत्तिरिति भावः अथ कारणानां कारणतावच्छेदकसंबं
धघटितस्यैकक्षणावच्छिन्नसामानाधिकरण्यस्यैव फलोपधानप्रयोजकत्वनियमेन कथमेतदिति चेन्न दंडत्वचक्रत्वादिना पृथग्घेतुत्वेपि दंडसंयुक्तचक्रादी
नां फलोपधायकत्वेन तादृशनियमस्यैवासिद्धेरित्याशयात् दीधितौ वार्द्रेंधनत्वादिनेति आदिना वह्नित्वपरिग्रहः तथा चार्द्रेंधनत्वेनार्द्रेंधनमेवोपाधिर्नत्वा
र्द्रेंधनप्रभववह्निरित्यार्द्रेंधनप्रभववह्निमत्त्वमिति मूलमसंगतमिति भावः वस्तुतस्तु संयुक्तार्द्रेंधनत्वेनापि न कारणत्वं जलत्वेंधनत्वाभ्यां संयोगेन स्वातं राम०
त्रेणाहेतुत्वात् तथा चार्द्रेंधनस्याप्यनुपाधित्वे आशंकातात्पर्यं एवं चादिना जलत्वेंधनत्ववह्नित्वानां परिग्रह इति ध्येयं कारणतावगमेनेति मूलस्य नोक्तार्थकत्वमु

क्तदोषद्वयस्य प्रकारांतरेण परिहर्त्तुं शक्यत्वादित्याशयेनाह किं चात इति अतः किमनिष्टं न किमपीत्याशयः उक्तदोषद्वयमनूद्य तन्निरासपरतया नहीत्यादिग्रंथं योजय
ति आख्यायामार्द्रेंधनप्रभववह्नित्वस्येत्यादि दीधितौ तादृशेति तद्वृत्तित्वस्येत्यर्थः क्वचित्तथैव पाठः तदवच्छिन्ने इति आर्द्रेंधनप्रभववह्नित्वावच्छिन्ने इत्यर्थः तद्वृत्तित्वेनाता
दृशाभाववद्वृत्तित्वेनासाधनं इति आर्द्रेंधनप्रभववह्नित्वस्येति शेषः व्याख्यायां वस्तुगतिमनुरुध्येति मूले अभिप्रेतमिति शेषः वक्ष्यमाणरीत्यार्द्रेंधनप्रभववह्नि
त्वेन कारणत्वस्य वस्तुगत्या सत्त्वादिति भावः तेन रूपेण आर्द्रेंधनप्रभववह्नित्वेन कारणत्वमपीत्यपिस्तेन रूपेणेत्यनंतरं योज्यः अव्यवस्थापयतीत्यग्रिमग्रंथात् आ
र्द्रेंधनप्रभववह्नित्वं यदि धूमव्यापकतावच्छेदकं न स्यात्तदा धूमकारणतावच्छेदकं न स्यादिति तर्कस्येष्टापत्तिदोषग्रस्ततया तत्र धूमव्यापकतावच्छेदक
त्वग्रहस्यैवासंभवादिति भावः पूर्वोक्तस्य फलोपधानप्रयोजकस्य परस्परप्रत्यासन्नत्वस्याभावादेव धूमानुत्पादसंभवादित्यत आह दीधितौ तत्संयुक्तेचेति वह्नौ शु
ष्केंधनजन्यवह्नौ नन्वार्द्रेंधनसंयुक्तवह्निसत्त्वे दाहोत्तरं धूमोत्पादस्य सर्वसिद्धत्वे येदेवमत आह दाहे इति धूमानुत्पादात् धूमोत्पादप्रसंगात् इदमुपलक्षणं दाहप्र
तिबंधकासत्त्वे पि यथा कथंचिद्वह्निसंयोगाद्धूमानुत्पादेन दाहोत्तरमेव धूमोत्पादात्पूर्वं धूमोत्पत्त्यापत्त्या आर्द्रेंधनप्रभववह्नित्वेन कारणत्वमावश्यकमित्य
पि द्रष्टव्यं दाहप्रतिबंधकतृणाद्यभावानां धूमं प्रत्यपि कारणत्वकल्पनान्न दोष इत्यत आह क्लृप्तेति तत्कारणेति धूमकारणेत्यर्थः तत्कारणत्वेति धूमकारणतेत्य
र्थः अन्यथेत्यादिति आर्द्रेंधनप्रभववह्नित्वावच्छिन्ने धूमं प्रत्यनन्यथासिद्धत्वस्य क्लृप्ततया आर्द्रेंधनप्रभववह्नित्वे धूमनियतपूर्ववर्त्तितावच्छेदकत्वमात्रकल्पने ला

भा.प्र.

घवंदाह प्रतिबंधकमणाद्यभावानां धूमकारणत्वे कल्पने च मण्याद्यभाववदाद्यवच्छिन्ने धूमं प्रत्यनन्यथासिद्धत्वं तेषां तन्निपतत्पूर्ववर्त्तितावच्छेदकत्वं च कल्पनीय
मिति गौरवमिति भावः आलोयां प्रतिगौरवं प्रतिगौरवं [redacted] मपि दर्शयति आर्द्रेंधनत्वेन दक्लित्वेन च पृथक्कारणतामते हूयमाणांतरत्वेन दर्शयति न द्विं
धनेति प्रतिरुद्धेंधनेत्यर्थः धूमोत्पादादिति विद्वर्णोत्तिं संयोगसंबंधेनेति दर्शितेनेति तया च सामान्यतो धूमं प्रति प्रतिबंधकाभावानां कारणत्वे व्यभिचार इति भावः
एतेन धूमोत्पादादिसंतत्यं येन प्रतिबंधकाभावानां मण्याद्यभावानां कल्पनम् यापीति। अपिकारेण कालिकसंबंधघटितसामानाधिकरण्यप्रत्यासत्त्या
कार्यकारणभावकल्पनायाः समुच्चयः स्ववित मितितादृशकारणभावकल्पनायामप्युक्तव्यभिचारानुद्धारादिति भावः दीधितौ तन्न इंधनेति उक्तव्यभिचारवारणा
येमादितत्र द्भावानामिति षष्ठीतत्पुरुषसमासः तत्र दिंधनसंबद्धमण्याद्यभावानामित्यर्थः कारणत्वस्याव्याप्यत्वादिति तथा च प्रतिरुद्धार्द्रेंधनजमधूमस्य त
दानीमनुत्पादेनाप्रतिरुद्धेंधनजमधूमस्य प्रतिरुद्धस्यक्ताचुत्पादेप्यप्रतिरुद्धेंधनसंबद्धत्वविशिष्टमण्याद्यभावस्यापि तत्र सत्त्वान्नोक्तव्यभिचार इति भावः गौर
वाच्चेति आर्द्रेंधनप्रभववह्नित्वस्य कारणतावच्छेदकत्वमिति शेषः अन्यथा निराकांक्षतयाप्येवम्यं तद्व्यस्यानन्वितताप त्तेः प्रतिगौरवरूपदूषणांत
रोद्दिधीर्षयाशंकते प्याख्यायां नवेति उद्देश्यत्वमिति प्रत्यासत्तिः। अनुषज्यते व्यभिचारात् एकस्यामिसादिनोक्तव्यभिचारात् उपधायकत्वमिति जं राम॰
न्यताद्यवच्छेदकप्रत्यासत्तिरित्यनुषज्यते संयोगेनेति अवच्छिन्नप्रतियोगिताकत्वं तज्जातीयाभाव इत्यनेनान्वयी एवमग्रेपि प्रतिगौरवमिति प्रतिरुद्धेंध

नयक्त्वावुपधायकतासंबंधेन धूमोत्पत्त्यभावेनोक्तव्यभिचारवारणोनेंधनव्यक्तिभेदेन कार्यकारणभावानंत्यापादिसाशयः अत एवउधाय
कताघटितसामानाधिकरण्यप्रत्यासत्त्या मण्याद्यभावानां कारणतादेवं पत्रेंधने पदिंधने पदिंधनव्यक्तौ न जातः कदापि न जातः अनि
संबंधेनेति तत्तीणार्णोऽभेदः सामान्यसामग्र्युबुयी न धूमोत्पत्तीति उपधायकतासंबंधेन धूमोत्पत्तिकरणेत दिंधने मण्याद्यभावरूपकार
णासत्वादिति भावः अन्यथा संयोगादिघटितसामानाधिकरण्यप्रत्यासत्त्यैंधनव्यक्तिभेदेन मण्याद्यभावानां कारणत्वे हेतुताकल्पनात्तदिंधनमंतर्भाव्य मणा
द्यभावस्योक्तरीत्या हेतुत्वकल्पनासंभवेन सामान्येति वन्यात्मके सर्वथा धूमसामान्योत्पत्तीति रहस्यमुपलक्षणं अत एव पत्रेंधने कदापि मण्यादिसंबंधो न जातस्त
त्स्थलीयसामान्यसामग्रीतो मण्यादिसमवधानस्थलेपि न धूमोत्पत्त्यापादनमन्यथा तदिंधनसंबद्धमण्यादेरप्रसिद्धोक्तक्रमेण तत्र मण्याद्यभावस्य हेतु
त्वकल्पनासंभवेन तत्स्थलीयसामान्यसामग्रीतो धूमसामान्योत्पत्त्यापातादित्यपि द्रष्टव्यं उपधायकतादीनामिति तत्तदुपधायकादिस्वरूपाणामित्यादि
आदिना जन्यजनकभावादिपरिग्रहः मानाभावादिति तथा चोपधायकतासंबंधघटितसामानाधिकरण्यप्रत्यासत्त्या मण्याद्यभावानां हेतुतासंभवेनोपदर्शि
तरीत्यातिगौरवं दुर्वारमेवेति भावः नन्वेवमुक्तधूमसामान्योत्पत्त्यापातोऽदुर्वार एवेत्यत आह धूमानुपधायकेति फलाभावेन धूमानुत्पादेन तादृशविशेषेति ता
वदिंधनान्यतमात्मके तत्प[illegible]विरहेणापीति अपिना तादृशमण्याद्यभावात्मकविशेषसामग्रीविरहपरिग्रहः धूमानुत्पादसमर्थनसंभवात् उक्तधूमसा

भा० प्र० भामीमत्वापातवारणासंभवात् तावदिंधनात्मतमताद्दशमणिपाघभावान्मतरात्मकविशेषसामग्रीसहकृताया एव सामान्यसामान्यात् सामान्यकार्यो
त्पादकत्वेनोक्तस्थले विशेषसामग्र्यभावेन सामान्यकार्योत्पत्त्यसंभवादिति भावः उपधायकत्वादीनां संबंधत्वस्य संदिग्धत्वेन तदनुपेत्याह एवमपी
तिउपधायकत्वादीनां संबंधत्वेपीत्यर्थः अतिस्फुटत्वाच्चेति तथा च तेषां संबंधत्वस्य संदिग्धतया संबंधत्वाभावेऽतिगौरवरूपद्वितीयदूषणस्यापि
स्फुटमेव संबंधत्वे च द्वितीयदूषणाभावेपि समप्रीत्यादिनोक्तं प्रथमदूषणं दुरुद्धरमेवेति भावः अत एव उपधायकत्वादीनां संबंधत्वे मानाभावा
देव आर्द्रेंधनत्वेनैव एवकारेणार्द्रेंधनप्रभववह्नित्वात्मकविशिष्टरूपस्यैव व्यवच्छेदः तयोः जन्यजनकभाव इति परस्परमित्यादिग्रन्थासंगतिः फ
लोपधायकतानिर्वाहकसंबंधत्वं देवाह परस्परेति तथा च वह्नित्वार्द्रेंधनत्वाभ्यां समेकरूपेणाहेतुत्वेपि जन्यजनकभावसंबंधेनार्द्रेंधनविशिष्टव
ह्नित्वेनार्द्रेंधनप्रभववह्नित्वपर्यवसितेन फलोपधायकत्वाभ्युपगमादेव समप्रीत्यादिनोक्तदूषणाद्यवारणो विशिष्टरूपेणाहेतुत्वे मानाभाव इत्या
शयः अथास्त्विति उपधायकत्ववज्जन्यजनकभावस्य संबंधत्वाभावादिति भावः जातिविशेष एवेति एवकारेण विशिष्टरूपोपाधिव्यवच्छेदः तेन रूपेण
हेतुत्वे विशेष्यविशेषणभावे विनिगमनाविरहेणाकारणतावच्छेदकगौरवाच्चेति भावः वह्निनिष्ठः आर्द्रेंधनप्रभववह्निनिष्ठः तथा च जातिविशेषस्य राम०
सोपाधितावच्छेदकः स्वस्याप्यवैजात्यतामपि सिद्धेत्याशयः तार्णत्वादिना तृणादिजन्यतावच्छेदकवह्निनिष्ठजात्या जन्यतावच्छेदकत्वेति सिद्धसेति शेषः

नानात्वेपितादृशजातिव्याप्यविरुद्धमेदेन नानात्वेपि अशेषादिति जन्यतावच्छेदकानुगमस्याहोषत्वाद्दिसाशमः एकशक्तिमत्वादिना हेतुत्वे तार्णत्वा
दिजातेरभावादाहरवमिति हारीतेतितिमग विशेषेसमर्थः उपयोगात्तान्स्मरणार्थं प्रदानात् नोदनत्वादिनासांकर्यभयाद्दाहत्वो स्वाभिघातत्वादि वि
रुद्धेति जातिविशेषएवेति आर्द्रेंधनवह्निसंयोगत्वरूपोपाधेरवच्छेदकत्वे विशेषणाविशेष्यभावे विनिगमनाविरहादिति भावः तदवच्छिन्नतादृशजा
तिविशेषावच्छिन्नं कल्प्यत इति तथाच प्रतिबंधकसत्वे विजातीयसंयोगरूपकारणाभावादेव न दाहादिकार्यमिति भावः तत्प्रतिबंधकत्वेतिमण्यादिप्र
तिबंधकत्वेसमर्थः एतन्मतेस्वसमवायिसंयोगः कारणतावच्छेदकसंबंधः तेनसंबंधेन विजातीयसंयोग एवोपाधिरिति छेपंप्राहुरिति अस्वरस
स्यसर्वसिद्धस्यदाहं प्रतिमण्यादिप्रतिबंधकत्वस्यविलोपः एवंकर्मादिजन्यतावच्छेदकजात्यासांकर्यापत्या तादृशजातिविशेषव्याप्यविरुद्धत्वमेदेन
कर्मादिजन्यतावच्छेदकजातेर्नानात्वस्य तदवच्छिन्नेकर्मादिनानाहेतुत्वस्य कल्पने महागौरवमिति मूलेति तदुत्कर्षे रोमादिमूले समर्थः युक्तंतरं आर्द्रेंध
नयमवद्वह्नित्वेन हेतुत्वेस्मादृशिवृत्तां मतमिति शेषः तदवच्छिन्नेति आर्द्रेंधनत्वावच्छिन्ने समर्थः प्रकर्षादिति एवकारेण विशिष्टरूपावच्छिन्नप्रकर्षव्या
वच्छेदः वाच्येति कारणतावच्छेदकावच्छिन्नप्रकर्षस्यैव प्रकृष्टकार्यप्रयोजकत्वादिति भावः तत्सत्वेपि आर्द्रेंधनत्वावच्छिन्नप्रकर्षसत्वेपि तन्नापनार्थमे
वह्निमहतिवार्द्रेंधने महतिवह्नौ विन्दुकं दीधितौ तत्वेन छि आर्द्रेंध प्रभवप्रकृष्टवह्नित्वेन हेतुत्वादिति प्रकृष्टधूमं प्रतीत्यादि प्रतिबंधकाभावस्यापीतित्या

गा० प्र० चतद्धेतुतयापिन निर्वाह इति भावः आर्द्रेंधनप्रभवमहानसाभावरक्षणायाह दीधितावर्णोपसीति महतो वह्न्यंतरस्यार्द्रेंधनप्रभवत्वे प्रकृष्टधूमानुसारेऽसिद्ध एवेत्य
त आह व्याख्यायां शुष्केंधनेति दीधितावार्द्रेंधनप्रभववह्नित्वेनेति पदविशेषयोरित्यादिन्यायादिति भावः व्याख्यायां नजातीति मानाभावादिति भावः न कार्यतेति आ
र्थसमाजग्रस्तत्वादिति भावः तदेवोपपादयति धूमस्येति इत्यादिकमिति आदिना पदविशेषयोरिति माघेन वह्नित्वेनैव कारणतास्विधमिति मत्वार्द्रेंधनप्रभववह्नि
त्वेनेत्यस्य परिग्रहः अग्रे तु दीधितौ सत्यपि चेत्यादिदर्शितस्यंतमेको ग्रंथस्तथा च दीधितिकारस्य पृथक्कारणताद्वयमेवाभिमतं न तु विशिष्टरूपेणेत्यकुशल दूसन् गौर
वाद्वेति चकारासंगतेः मूलानुक्रमपीति धूमार्द्रेंधनप्रभववह्नेरन्वयव्यतिरेकमिति विशेषः मूले साध्योत्कर्षादिपंचग्रंथं तन्नपार्थस्यार्द्रेंधनप्रभववह्नेरद्भूतरूपस्पर्शाद्रूपा
कस्य कारणताग्रामे यथासंख्येनान्वयादिति भावः मूलनेति तयोरन्वयव्यतिरेकस्यापि कारणतावगमहेतुत्वसंभवादिति भावः दीधितौ तत्रेति धूमेदसर्थः कारणतान्व
यिनिरूपितत्वं समभ्यर्थ्य कारणतावच्छेदकमिति अस्तित्वमिति मेणाद्वितं वास्त्वं स्वमतमुक्त्वाभ्युपेत्यवादेन विशिष्टस्य कारणतानवच्छेदकत्वेपि न क्षतिरित्या
शयेनाहार्थवशेत्यादिवांतमेको ग्रंथः अर्थवशासंपन्नं उपधायकताग्राहकप्रमाणासिद्धं अतएव नांतरीयकमेव कारणतानवच्छेदकमपि फलोपधायकताव
च्छेदकं जन्यजनकभावसंबंधेनार्द्रेंधनविशिष्टवह्नेः फलोपधायकतांगीकारेणार्द्रेंधनप्रभववह्नित्वस्य फलोपधायकतावच्छेदकत्वपर्यवसानादिति भावः न राम०
नु जन्यजनकभावस्य संबंधत्वे मानाभावः अतएव पूर्वमतएवेत्याद्युपात्तमितं तग्रंथेनापंचकारः खंडितस्तत्रूपमेतदत आह व्याख्यायां वह्न्यार्द्रेंधनयोरिति सं

योगेनेतिशेषः। समासत्तिः उपधायकतानिर्वाहकसंबंधः अभिप्राय इति तथा च जन्यजनकभावस्य संबंधत्वमभ्युपेत्य इदमुक्तं अत एवात्रानास्थास्वरकस्य वाशब्दस्या
प्युपादानमिति भावः। उभयथापि विशिष्टरूपेणाहेतुत्वे पृथग्रूपेणाहेतुत्वे च संभवादिति। इत्थं च विशिष्टरूपेणाहेतुत्वे तद्रूपं यदि धूमव्यापकतावच्छेदकं न स्यात्तदा
धूमकारणतावच्छेदकं न स्यादिति पृथग्रूपेणाहेतुत्वे च तद्रूपं यदि धूमव्यापकतावच्छेदकं न स्यात्तदा धूमोपधायकतावच्छेदकं न स्यादिति व्यापकताया आह
कृतकार्यकारइतिध्येयं मान्मात्स्कृतन्त्रेत्यादिवांतरएकोग्रंथो विशिष्टस्य कारणतावच्छेदकत्वपर एव तथा हि। अर्थवशेति उपधायकताया आह दर्शनमाणसिद्धमित्यर्थः। न च
वह्नित्वमेव तादृशप्रमाणसिद्धमवच्छेदकमस्त्विति वाच्यं तथा सति समनियतत्वे सादिदोषदुर्वारत्वात् नन्रूप धापकत्वमेव धूमवह्न्योः संबंधो न तु संयोग इति वह्नि
त्वस्य तत्त्वेऽपि न कोऽपि दोष इत्यमित्यत आह नांतरीयकत्वेति अर्थान्निलिन सत्वादवच्छेदकमेवेत्यर्थः। तथा च कारणतावच्छेदकसंबंधमध्ये निक्षिप्यतत्समतद्वच्छे
दकत्वखंडने दंडादिप्रतियोगिकसंयोगादेः संबंधत्वोपगमेन नैवान[redacted]इति प्रसंगेऽनुमादंडत्वादिना हेतुताऽपि विलुप्येतेति भावः। फलतः फलवद्व्यापकताय हे
नेति उभयथैव कारणतावच्छेदकत्वेन तर्कसंभवादिति भावः इत्याहुः केचित्तु आर्द्रेंधनदाहस्यापि धूमप्रयोजकनिरुक्तकारणत्वोपगमेन समनियतत्वेत्यादिदोषदुर्वा
रत्वासंभवेनार्द्रेंधनत्वादिना पृथगेव हेतुत्वं सम्यगित्याहुः। तदसत् तदा दहस्य रूपरसादिभेदभिन्नतया दाहस्यानिरुक्तनानाकारणत्वकल्पनापेक्षया विशिष्टरू
पेणाहेतुताया एवोचितत्वात् अन्यथा तु उभयथारंभकेषु परमाणुषु रसविशेषोत्पन्नेषु आर्द्रेंधनारंभकेषु तेषु रूपविशेषोत्पत्तौ धूमोत्पत्तिः इत्थं च धूमद्वारा फलत्वे

भा०प्र० नधूमत्वेनैव वा जन्यताजनकता च वह्नित्वेनैव स्वजन्यसंस्पर्शयोग्यं वा रूपं कारणतायां संबंधः कार्यतायां च समवायः संबंधः रूपस्य नीलपीतादिभेदाभिन्नस्य संबंधत्वान्ना-
ननुगमो दोषाय मण्यादिसमवधाने धूमानुत्पत्तिस्तु रूपविशेषविरहादेव तादृशरूपेण जलसंयोगोऽपि सहकारी दग्धेन्धनसंयोगवत्तत्र तत एव जलविगमे भस्महेतुः
धूपामिकैवोत्पद्यते इंधनस्य चेंधनत्वेनैव कारणतात द्वह्नेरेकसंबंधः स्वसंयोगस्तादात्म्यं वा कार्यतायां च संयोगः संयोगविशेषो वा संबंध इति वदंति तदयसत् तु
ल्पेयुक्तेंधनारंभकपरमाणुष्वरसादिविशेषो सत्तादेव धूमोत्पत्त्या विनिगमनाविरहेण रसादीनामपि संबंधत्वे तत्र जलसंयोगस्य सहकारित्वे ऽतिगौरवात् किंच
रूपादिविशेषस्य समवायसंबंधेन धूमोत्पत्तावेव नियामकतया मण्यादिसमवधानदशायां संयोगसंबंधेन धूमोत्पादापत्तिर्दुर्वारैव न च समवायसंबंधेनोत्पत्ति-
विनासंयोगसंबंधेनोत्पत्तेरस्वीकृतत्वात्तत्सामग्रीविरहादेव न संयोगसंबंधेनापि धूमोत्पाद इति वाच्यं संसारस्यानिपतया देशांतरे तदानीमवश्यं धूमोत्पत्त्या स-
मवायसंबंधेन धूमोत्पादकसामग्र्या अपि सत्त्वात् न हि समवायसंबंधेन धूमोत्पत्तिकारणानां संयोगसंबंधेन धूमोत्पत्तिदेशांतर्भाव्यजनकत्वं येनोक्तापत्तिर्वा-
रेणास्यादिति संक्षिप्तरेण तादृशान्वयव्यतिरेकाभ्यामिसत्रान्वयव्यतिरेकयोरुद्भूतरूपसत्त्व एव वह्निर्दृश्यस्य समसत्त्वं न तु तद्दशत्वेऽस्येवमाकारकत्वेनोद्भूतो द्रव्यस्यै-
व वा कारणत्वमिति सन्नतयोस्त्वयोरनुपपन्नइत्यत आह उद्भूतरूपवत एवेत्यादि दीधितौ तादृशेति अनन्यथासिद्धेत्यर्थः उद्भूतरूपस्येति कारणत्वमित्यग्रिमेणा राम०
न्वयः इदं च स्वमतेन प्राचीनमाचीनमतेनाहत दृतो द्रव्यस्यैव वेति वा द्याद्विसक्षवारणाय उद्भूतरूपत्वेनोद्भूतरूपं स्वातंत्र्येण न समस्तहेतुः अपितु विषयविधया ल्ला

यांऽव्यहेतुतायामेवोद्भूतत्वेनोद्भूतरूपमवच्छेदकमिति प्राचामाशयः उभयथ्यापि मतभेदेनोद्भूतरूपत्वस्य कारणतावच्छेदकत्वे तदवच्छेदकत्वेवाव्याप
कत्वमिति उद्भूतरूपत्वस्य कारणतावच्छेदकत्वे उद्भूतरूपत्वं पद्विबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकतावच्छेदकं न स्यात् तदा बहिर्द्रव्यप्रत्यक्षकार्यता
वच्छेदकं न स्यादित्यसाकारकतर्कोव्यापकताग्राहकस्तत्स्य कारणतावच्छेदकतावच्छेदकत्वेचकारणतावच्छेदकतावच्छेदकं न स्यादित्यतोव्यापकताग्रा
हकइत्याशयः वाशब्दसूचितां प्राचीनमतेनास्यांविशदयति व्याख्यायांतत्वमिति बहिर्द्रव्यस्येति आत्मप्रत्यक्षेव्यभिचारवारणाय बहिष्टुनिवेशः गु
णादिप्रत्यक्षेतद्वारणाय द्रव्यत्वनिवेशः लाघवादाह मूर्त्तस्येति लाघवादिति उद्भूतरूपवद्द्रव्यत्वेन हेतुत्वेविशेष्यविशेषणभावे विनिगमनाविरहेण कार्यका
रणभावद्वयमवच्छेदकगौरवं चेति भावः उद्भूतत्वेनेति अनुद्भूतरूपवतां चक्षुरादीनां प्रत्यक्षवारणाय उद्भूतेति उद्भूतस्पर्शवतां वाय्वादीनां प्रत्यक्षवारणाय
रूपेति तन्नेति कार्यस्येति शेषः विषयतेति कारणस्येति शेषः ननु भावानेवेति तथा च विषयविधया द्रव्यस्य द्रव्यत्वेन कारणत्वं नैव नास्ति उद्भूतरूपस्यावच्छेदकत्व
मित्यपि प्राचीनमते दूषणमिति भावः प्रागेव अनुमितिलक्षण एवत्यवमितिशेषः ननूद्भूतत्वस्यैकस्य निर्वक्तुमशक्यतया कथमुद्भूतरूपत्वेन हेतुत्वं न चोद्भू
तत्वं रूपत्वव्याप्यजातिविशेष इति सांप्रतं नीलत्वादिना संकरात् न च नीलत्वादिव्याप्यं नानैवोद्भूतत्वमिति न संकर इति वाच्यं गौरवात् कारणतावच्छेदकाननुगमेन
व्यभिचारप्रसंगाच्च न च नीलवद्द्रव्यविषयताशालिप्रत्यक्षं प्रति नीलत्वव्याप्योद्भूतत्वेन एवं पीतादिकं निवेश्यैवं क्रमेण हेतुत्व कल्पनान्न व्यभिचार इति वाच्यं

म.प्र. नीलादेर्विशेषणतया कार्यतावच्छेदककोटौ निवेशे निर्विकल्पकासंग्रहापत्त्योपलक्षणतयैव निवेशेन पाकरक्तघटादिप्रत्यक्षे व्यभिचारवारणात्
न च नीलादिविषयताशालिद्रव्यप्रत्यक्षं प्रति नीलत्वव्याप्योद्भूतत्वादिना हेतुत्वान्नोक्तव्यभिचार इति वाच्यं नीलं रूपादिमान् प्रतिबंधकदोषकालीननीलादि
द्रव्यप्रत्यक्षासंग्रहप्रसंगात् न च स्वसमवायिलौकिकविषयत्वकालिकविशेषणतोभयसंबंधेन नीलविशिष्टप्रत्यक्षत्वादीनां कार्यतावच्छेदकत्वान्नकोपि
दोष इति वाच्यं एवमपि तादृशोभयसंबंधेन नीलविशिष्टप्रत्यक्षत्वादिकं नीलत्वव्याप्योद्भूतत्वजातिमद्विशिष्टद्रव्यप्रत्यक्षत्वादिकं वा जन्यतावच्छेदकमित्य
त्र विनिगमकाभावेनानंतकार्यकारणभावप्रसंगेनातिगौरवादिति चेन्मैवं नीलत्वादिव्याप्यनानैवोद्भूतत्वं तदवच्छिन्नभेदकूटवद्रूपत्वं चोद्भूतरूपत्वं ज
नकतावच्छेदकमतो न दोष इति भट्टाचार्यसंमतः संप्रदायः नवीनास्तु निरुक्तोद्भूतरूपत्वेन हेतुत्वे तावद्भेदानां मिथो विशेष्यविशेषणभावे विनिगमनाविर
हेणाकारणतया वा ह्युत्पन्नमवच्छेदकगौरवं चेति रूपत्वेन तत्तदनुद्भूतत्वावच्छिन्नासंतोभावत्वेन च पृथगेव कारणत्वं कल्प्यते तादृशाभावकार्यतावच्छेदकं च प्र
त्यक्षत्वमेव गुरुत्वादावपि तत्सत्वेन व्यभिचाराभावात् तद्रूपस्य च मूर्तप्रत्यक्षत्वं जन्यतावच्छेदकमतो नात्मनि व्यभिचारः न चोद्भूतरूपत्वस्य कारणतानवच्छेदकत्वे
उद्भूतरूपत्वावच्छिन्ने बहिर्द्रव्यप्रत्यक्षत्वव्यापकत्वग्रहानुपपत्तिः तत्र ग्राहकतर्कासंभवादिति वाच्यं तादृशाभावविशिष्टरूपत्वस्य फलोपधायकतावच्छेद राम०
कतयोद्भूतरूपत्वं यदि बहिर्द्रव्यप्रत्यक्षत्वव्यापकतावच्छेदकं न स्यात् तदा फलोपधायकतावच्छेदकं न स्यादित्याकारकतर्कस्य व्यापकताग्राहकस्य संभवात्

वस्ततस्तुसर्वत्रानुद्भूतंस्पर्शरूपमेवतथाचनीलादेरनुद्भूतत्वास्वीकारेरागतदवछिन्नाभावोनहेतुःकिंतुस्पर्शरूपत्वव्याप्यैकानुद्भूतत्वावछिन्नाभावोरूपंचहेतुर्वि
शिष्टरूपेणहेतुत्वेतदवछिन्नभेदरूपत्वयोर्विशिष्यविशेषणाभावेविशेष्यविशेषणतोवछेदकभावेवाविनिगमनाविरहेणाकारणताद्वयस्यावश्यकत्वाद
वछेदकगौरवाधिक्याच्चतच्चनीलादिकमादायविनिगमनाविरहःतेजोनुरोधेनानुद्भूतस्पर्शरूपस्यावश्यकत्वयाघ्राणादेववाप्तस्यैवस्वीकारात् नचभास्वर
त्वेनसांकर्यमितिवाच्यंचक्षुषिभास्वरानंगीकारेणानुद्भूतत्वस्यभास्वरत्वविरुद्धत्वेनसांकर्याभावात् तत्त्वमित्यादिदीधितिग्रंथस्याप्येवंतात्पर्यमुपवर्णित
मित्यस्योपवर्णितप्रायमित्यर्थस्तेनोक्तस्यस्वयमनुपवर्णनेपिनासंगतिरित्याहुस्तन्नातीवरमणीयंअवछेदकताया व्यासज्यवृत्तित्वस्यव्यवस्थापनेनोक्तगौ
रवासंभवात्कारणतावछेदकावछिन्नाभावस्यैवकार्यतावछेदकावछिन्नानुत्पादप्रयोजकतयामूर्तत्वप्रत्यक्षत्वावछिन्नानुत्पादप्रयोजकत्वेदोर्दम्यापत्तेश्च
किंचनीलादेरनुद्भूतत्वानंगीकारेलघुभूततानियतारंभवादत्यागेनगुरुभूतनियतारंभवादस्वीकारापत्तिःअन्यथानीलाद्यारंभकपरमाणूनामपिघ्राणाद्यारं
भकत्वेनघ्राणादावनुद्भूतनीलादेर्दुर्वारत्वात् अपिचभास्वरतावछिन्नंप्रतितेजस्त्वेनसामान्यतोहेतुतयाचक्षुषिभास्वरोष्मणोबाधकाभावेनभास्वरत्ववि
रुद्धमनुद्भूतत्वमित्यसंगतमेवनचभास्वरत्वावछिन्नंप्रतितेजस्त्वादिनानहेतुताकिंत्ववयविभास्वरत्वावछिन्नंप्रतिअवयवभास्वरत्वेनैवहेतुतातथाच च
क्षुःपरमाणौभास्वरानंगीकारात्चक्षुषिभास्वरोष्मसत्त्वइतिवाच्यंअवयविस्पर्शंप्रतिअवयवस्पर्शत्वेनसामान्यतोहेतुतयातन्तुएवावयविस्पर्शकोष्मणोप्य

भा० प्र० व्ययविभास्वरं प्रत्यवयवभास्वरस्य हेतुत्वाभावात् न चैवं भास्वररूपं तेजस्येवोपलभ्यते नान्यत्रेत्यत्र किं नियामकमिति वाच्यं भास्वरं प्रति तेजस्त्वेन हेतुताया एव निया
मकत्वात् न चावयवभास्वरस्य तेजसो वा हेतुत्वमित्यत्र नियामकाभाव इति वाच्यं अवयवभास्वरस्य हेतुत्वे स्वाश्रयसमवेतत्वं प्रत्यासत्तिस्तेजसो हेतुत्वे च तादा
त्म्यमेव प्रत्यासत्तिरिति लाघवस्यैव नियामकत्वादिति क्व मूले घटोन्मज्जनप्रसंगेन चेति भावः तं यदि जन्यत्वावच्छिन्नविनाशव्यापकतावच्छेदकं न स्या
त्तदा जन्यत्वावच्छिन्नविनाशकारणतावच्छेदकं न स्यादित्याकारकेण घटोन्मज्जनप्रसंगमूलकान्तर्केणेत्यर्थः व्याख्यायां घटोन्मज्जनमित्युक्ततर्के घटोन्मज्जनप्र
संगमूलकत्वमस्य इत्यति घटोन्मज्जनप्रसंगेऽत्युक्ततर्के विरोधाप्राप्तिशंकात्मकदोषनिरासप्रयोजकत्वमवस्थापनेन व्यवस्थापयति जन्यत्वेनैवेति एवका
रणाभावस्थलावच्छेदः तदानीं घटध्वंसकाले तदिति घटे इत्यर्थः प्रसंग इति तथा च घटोन्मज्जनप्रसंगापत्त्यानेष्टापत्तिरिति भावः दीधितौ प्रतियोगिध्वंस इ
वेति प्रतियोगिध्वंसो यथा प्रागभावध्वंस इत्यर्थः व्याख्यायां प्रागभावध्वंसस्येति प्रतियोगिरूपस्येति शेषः प्रागभावेति उक्तव्याप्तिबलादित्यादि प्रागभाव
सत्त्वरूपतदुन्मज्जनमित्यर्थः दीधितौ तद्ध्वंस इति प्रतियोगिध्वंसध्वंस इत्यर्थः प्रतियोगिनो ध्वंस इति तथा च घटध्वंसध्वंसकाले प्रतियोगिध्वंसानधिकरणत्वाभा
वात्त घटोन्मज्जनप्रसंग इति भावः व्याख्यायां लाघवात् भावत्वानिवेशप्रयुक्तलाघवात् जन्यत्वेनैव ध्वंसं प्रतीति प्रागभावव्यावृत्तप्रतियोगितायाः कार्यतावच्छेद राम०
कसंबंधत्वात् प्रागभावध्वंसे व्यभिचारः प्रागभावस्य हेतुत्वे च स्वातंत्र्ये गौरवं कार्यकारणभावद्वयस्याशयः कल्पन इति द्वन इति शेषः सामग्रीति तादात्म्येन जन्यत्वावच्छि

त्वसध्वंसेसत्वादितिभावः ध्वंसध्वंसकस्यनाभयादेवध्वंसकारणतायांभावत्वंनिवेश्येतइत्यतआह कृत्स्नमुखेति प्रागभावप्रतियोगित्वरूपेति ध्वंसप्रतियोगि
त्वस्यध्वंसजनकताछेदकत्वासंभवादितिभावः लाघवेनेतिउपाध्यपेक्षयाजातेरवच्छेदकत्वेलाघवमितिभावः ननुनित्यस्यध्वंसापत्तिवारणायैवध्वंसं
प्रतिजन्यभावत्वेनहेतुतासिद्धांतिभिरप्युपेयते सत्त्वेनैवध्वंसहेतुतायांचतद्वारणमशक्यमतआह नित्यस्येति असमवायिनाशाभावादितिइदंचनव्यमतेनप्राचीनम
तेसमवायिनाशाभावादिमपि दुष्प्रत्यं गुणादेरिति नित्यस्येत्यनुषज्यते गुणायोरिति अनंतरस्येति शेषः विशेषसामग्रीविरहेणेति अथविशेषसामग्री वि
रहेणैवनित्यस्याविनाशेसत्त्वेनैवध्वंसहेतुतापिनिर्युक्तिकेतिचेन्न विशेषसामग्र्यभाव-टघटितकारणत्वस्यसामान्यांदैनाशसामान्यानुसाराद्धिकरणत्वप्रयोज
कत्वेनैगौरवेणतद्धेतुतायाआवश्यकत्वात् ननुतेजःसंयोगात्मकपाकस्यापिरूपनाशकतयाकृतस्यविशेषसामग्र्यात्मकस्यनित्येसंभवेनकथंविशेषसाम
ग्रीविरहइत्यतआह पाकस्येति अपार्थिवरूपेति पार्थिवरूपभिन्नेत्यर्थः अन्यथापाकस्यापा[redacted]र्थिवरूपनाशकत्वेतद्धटितत्वेनवसमावत्वंच नचघटत्वादिक
माहायविनिगमनाविरहः आगमरूपेतियाघेनसंग्राहकत्तयासत्तायालघुत्वस्यैवविनिगमकत्वात्तन्मात्रस्यैकालिकेनसत्तावत्तमात्रस्य जन्यमात्रस्यैवेति नचम
हाकालस्यापिकालिकसंबंधेनसत्तावत्तयाजन्यमात्रस्यैवेत्यसंगतमितिवाच्यं महाकालस्यजगदाधारतानियामिकायामहाकालमात्रवृत्तिकालिकविशेषण
तायाअतिरिक्तायाःपूर्वंव्यवस्थापनेनतद्वृत्तिकालिकसंबंधस्यापरिग्रहइत्याशयात् विशेषसामग्र्यपेक्षणीयेति तत्कालरूपविशेषसामग्र्यासहकृतस्यैव

भा॰ प्र॰ वस्तुत्वावत्वस्यध्वंसप्रयोजकत्वेचाफलेतिध्वंसरूपफलेत्यर्थःतस्य अत एव उक्ताशयादेवतत्त्वयोःकार्यत्वकारणत्वयोःअक्षतमितितथाचशाकपाकजत्वादेःकार्या
द्यनात्मकत्वेपिकार्यत्वाद्यात्मकत्वाद्दोषइतिभावःमूलेतदुपजीव्येतीतितदितिसामान्येनसकंकार्यकारणभावमुपजीव्येत्यर्थःव्याख्यायांतत्कारणत्वेपिपरि
माणकारणत्वेत्यर्थःइत्यादिदीत्यासर्वत्रैवेतिइयंपृथिवीत्वादित्यत्रइयत्त्वपृथिवीत्वयोर्व्याप्यव्यापकत्वेनिरुपधिसहचारग्रहोमूलंतंतुद्वयदेइयत्वसत्वे
जन्यसत्वेनइयत्त्वेनकार्यकारणभावोमूलमितिभावःतस्यकार्यकारणभावस्यघटादौपरिमाणासत्वेप्रत्यक्षादेरेवमूलत्वेतेनावयवमहत्त्वादीनांपरिमाणका
रणत्वकल्पनस्यनतन्मूलत्वमतआहतदितिसमशीलंतुल्यंतौल्यंचव्याप्तियाहकत्वेनैवबोध्यंअर्थःतदुपजीव्येतिमूलार्थःदीधितौसंदिग्धोपाधौतत्त्व
दितिमूलेसंदिग्धोपाधितयावस्तुमात्रशाकपाकजत्वाद्युपाध्यंतरवदित्यर्थःआरब्धानमितिसंदिग्धोपाधित्वेनेतिशेषःव्याख्यायांस्वव्याघातकत्वमितिसंदि
ग्धोपाधित्वनिवारकमितिशेषःशंकापापिशाचीत्वाभावोंहेहशंकाक्षितितथाचोपाधित्वशंकापाश्चौपचारिकंपिशाचीत्वमितिभावःदीधितौउपाधित्वशंका
पीतिनव्यभिचारशंकाधायिकेत्यनुवज्यतेव्याख्यायांशंकासत्वेउपाधित्वशंकासत्वेतदितिव्यभिचारशंकेत्यर्थःदीधितौशंकापक्षकमंतर्भाव्यव्यभिचारशंकाप
क्षेव्यभिचारशंकास्वारसिकत्वादृशसंकाएतेनपक्षेतरोपाधित्वशंकाहितव्यभिचारशंकायाअपिपक्षेव्यभिचारशंकात्वेनपक्षेव्यभिचारशंकेवेतिदृष्टांता राम॰
संगतिरितिसोशंकानवकाशःदीधितावन्यथेतिपक्षेतरोपाधित्वसंदेहस्यव्यभिचारसंशयाधायकत्वेनतदाहितव्यभिचारशंकायाःआप्तिज्ञानप्रतिबंधकंसे

वाऽसमर्थः आख्यायां॰तत्संदेहेन व्याप्यसंदेहात्मकसाधनविशेष्यकसाध्यव्यापकव्यभिचारसंदेहेन व्यभिचारसंदेहः साधने साध्यव्यभिचारसंदेहः तत्संदेहेन
व्याप्यसंदेहात्मकसाध्यविशेष्यकसाधनाव्यापकव्याप्यत्वसंदेहेन साध्ये साधनाव्यापकत्वस्येति साधने साध्ये व्यभिचारपर्यवसितस्येति शेषः तत्प्र
योजकेति क्रमेणातद्भयविधसंदेहप्रयोजकमित्यर्थः साधननिष्ठेत्यग्रिमव्यभिचारस्यान्वेनान्वितं व्यभिचारेति साध्यव्यापकव्यभिचारेत्यर्थः साध्य इत्यग्र
ग्रिमव्याप्यत्वेनान्वितं व्याप्यत्वेति साधनाव्यापकव्याप्यत्वेत्यर्थः दीधितौ तदाधानेति व्यभिचारशंकाधानेत्यर्थः प्रतिबंधकत्वासंभवादिति न हि प्रयोजन
ह्यतिनिषेमाद्दिग्यायादिति भावः कारणविशेषेति पक्षेतरत्वोपाधित्वसंशयाघटितसामग्रीजन्यत्वतत्संशयाजन्यत्वेत्यर्थः आख्यायां परिग्रहः इति तथा च प
क्षे व्यभिचारशंकेवेति पूर्वोक्तदृष्टांतासिद्धिरपीति भावः शंकासत्वेपीति इदमुपलक्षणं पक्षे व्यभिचारशंकासत्वेपीत्यपि द्रष्टव्यं प्रतिबंधाभावादिति ता
दृशशंकासत्वेपि गगनादौ द्रव्यत्वादिना परिमाणानुमितेरनुभवसिद्धत्वादित्याशयः सर्वसंयोगस्य पक्षत्वेपि करवहिःसंयोगस्य पक्षतादशाहकरवहिःसंयो
गमात्रस्येति बाधादिति संयोगे संयोगाद्यन्ति धर्माभावादिति भावः दीधितावप्रयोजकत्वादिति न शक्त्यादिसिद्धिरिति पूर्वेणान्वयः तथात्वेपि निरुपाधित्वे
पि व्याख्यायां अप्रयोजकत्वात् अप्रयोजकत्वापातात्तन्नु शक्तिसाधकानुमाने पक्षातिरिक्ते एव व्यभिचारसंशयाद प्रयोजकत्वमत आह दीधितावं
चेति शक्तिसाध्यकानुमाने चेत्यर्थः आख्यायां सर्वत्र द्वयादौ प्रतिबंधकः प्रतिबंधकत्वेनावश्यमभ्युपेयः इदनुपलक्षणं पक्षेतरत्वमप्युपाधित्वेनावश्य

मुपेयमित्यपि इष्टव्यं अनुपाधित्वेपि त्वयोपाधित्वानंगीकारेपि तदनुमानानां परिमाणादिसाध्यकसदनुमानानां निरूपाधित्वमिति तत्वापि मत इति शेषः ना
न संभवति इति इत्युक्तं व्याह पक्षेतरस्योपाधित्वे त्वयापि निरूपाधित्वं न स्यादित्याशंकायामाह इदंधितावयमिति उक्तानुमानानां निरूपाधित्वविषयकोपदिता
दित्यादिना वक्ष्यमाणव्याप्तोहोप्य मः प्रमाणेति प्रमाणसहकारिसत्तर्कसमर्थनविरहितत्वमिति उक्तानुमानानामिति शेषः निरूपाधित्वमिति तथा च स्म
स्वविपक्षबाधनांतरीयकतया तेषां निरूपाधित्वमेव नास्तीति भावः तदेवाह पतद्रूपादिः तत्र तत्र नन्तत्तदनुमाने व्याख्यायां मुद्रसाध्यव्यापकेति साध्यव
त्वप्रकारकप्रमाविशेष्यत्वादीत्यर्थः दूषणार्थमिति पक्षमंतर्भाव्यैव साधनाव्यापकत्वादिति भावः दूषणायेति सपक्षैकदेशवृत्तिधर्मस्योपाधेः पक्षवृत्ति
धर्मावच्छिन्नसाध्यवति पक्षेऽसत्वादिति भावः अथैकदेशपदव्यावृत्तिमाह सपक्षैकदेशवृत्तिधर्मस्येति उपाधित्वेनाभिमतस्येति शेषः अभावादिति पंचम्यं
तद्रूपस्य साध्याव्यापकत्वेऽन्वयः सपक्षेति पक्षेसाध्यादिसाध्याव्यापकत्वेति पक्षवृत्तिधर्मावच्छिन्नसाध्यवति सपक्षांतरे उपाधेरभावादिति भावः लाभापेति
सपक्षैकदेशवृत्तिधर्मस्य पक्षावृत्तित्वादिति भावः सपक्षैकदेशेति सपक्षांतरवृत्तिधर्माणामुक्तधर्मावच्छिन्नसाध्यव्यापकत्वादेकदेशेति दीधितौ धर्माणा
मुपाधित्वमिति न च पक्षेतरत्वस्य पक्षैकदेशवृत्तिधर्माणामप्यनुपाधित्वमेवेति वाच्यं तथा सत्युक्तरूपादेरुपाधित्वस्यानुपपत्तेः संभवतीति तथा च पक्षेत
रस्योपाधित्वानंगीकारेपि तदनुमानानां निरूपाधित्वासंभवेन पक्षेतरस्योपाधित्वांगीकारेणापि निरूपाधित्वं न स्यादिति शंका न संभवतीति यंत्रोभयोस्समो दोष

इत्यादिग्रन्थादिति भावः व्याख्यायां हेत्वाभाससाधारणेति हेत्वाभासस्यादिः सव्यभिचारग्रंथस्तत्रेत्यर्थः केचित्तु ननु करवहीत्याद्यनुमानाद्यदि पक्षेतरशक्त्यादिभि
द्धिस्तदा तस्यानुमानस्य तत्रैव व्यभिचारितया व्यभिचारस्यावश्यमुपाधिरिति नियमभंगापत्तिस्तस्यानुमानस्य निरूपाधित्वादिति तदस्याशंकां निराकरोति
दीधितौ कस्यापमिति दृष्टान्तरेति सार्वदिकेत्यर्थः तत्र तत्रेति करवह्निसंयोगं इत्यादिषु सर्वेष्वित्यर्थः सपक्षैकदेश इति धर्मान्तराणामिति दृष्टान्तादीनामित्यर्थः इत्थं
चेति पक्षीयव्यभिचारसंशयस्यापि प्रतिबंधकत्वे चेत्यर्थः अतिप्रसंगः पक्षेतरस्मिन्साध्यसंदेहस्थले व्याप्तिज्ञानानुत्पादप्रसंगः वक्ष्याम इति तत्र साध्यसंदेहस्या
प्रामाण्यनिश्चयेनाशेषव्याप्तिग्रह इति सव्यभिचारग्रंथे वक्ष्याम इत्यर्थ इत्याहुः तदसत् कथमन्यथेत्यादिग्रंथस्य पूर्वापरग्रंथपर्यालोचनया पक्षेतरत्वो
पाधित्वस्यैव पर्यवसानेन तस्यैव तत्रोपाधित्वापत्तौ तदस्योक्ताशंकाया एवासंभवात् गुरुत्वरणात्तद्दीधितावत्र चेति करवह्निसंयोग इत्याद्यनुमाने चे
त्यर्थः कुत्रापक्षातिरिक्त इति तथा च तत्र पक्षातिरिक्तेऽपि क्वचिदपि व्यभिचारशंकानास्तीत्येन पक्षसमंतर्भाव्य व्यभिचारसंदेहस्याप्रतिबंधकत्वेऽपि तत्र व्याप्तिज्ञानानु
त्पादनिर्वाह इति तत्र व्याप्तिज्ञानप्रतिबंधानुरोधेन पक्षसमंतर्भाव्य व्यभिचारसंदेहातिरिक्तत्वं व्याप्तिज्ञानप्रतिबंधकतावच्छेदककोटौ निवेशयितुमशक्यमिति भावः भा
ननु तत्र व्याप्तिज्ञानप्रतिबंधानुरोधेन पक्षसमंतर्भाव्य व्यभिचारसंदेहातिरिक्तत्वस्य प्रतिबंधकतावच्छेदककोटावनिवेशेऽपि पक्षेतरत्वोपाधितासंदेहाप्र
योज्यत्वरूपस्य कारणाविशेषाजन्यत्वस्य प्रतिबंधकतावच्छेदककोटौ निवेशे बाधकाभावः न चैवं तत्र पक्षेतरत्वातिरिक्तोपाधेरभावेन व्याप्तिज्ञानप्रतिबं

भा॰ प्र॰ यानुपपत्तिरेवेतिवाच्यं तत्र पक्षघटादिरूपसपक्षान्तरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकस्य घटादिमात्रवृत्तिधर्मस्यैवपक्षेतरत्वोपाधेस्तिरस्कृतस्यो
पाधित्वसंभवेन तत्त्वं देहस्य पक्षमन्तर्भाव्य व्यभिचारसंदेहसंपादकतया व्याप्तिज्ञानप्रतिबंधोपपत्तिसंभवात् तत्राह कस्यापि मित्यादि अत्रानुपाधित्वमित्यस्य
पक्षेतरस्यानुपाधित्वमित्यर्थः संभवतीत्यनंतरमतइतिशेषः पतस्यादिरिति संभवतीत्यन्तस्य व्याप्तिग्राहकेत्यादावन्वयः तथा च तत्र तादृशधर्माणामनुपाधित्व
संभावनायमतः अतः इदं तर्कव्याप्तिग्राहकभूमादर्शनादिविरहितानि दिरहेत्यव्याप्तिग्रहप्रतिबंधकतां पक्षेतरत्वानुपाधित्वं पक्षेतरत्वोपाधितासंदेहाभयोरत्व
स्य प्रतिबंधकतावच्छेदककोटौ निवेशेपि शक्यसाध्यसाधकत्वमित्यपं कोवा भ्रमः काचोक्तभ्रममूलिकाशंकाबाधकाभावेपि साधकाभावेन गौरवेणाचता
दृशाशयोऽनत्वस्य प्रतिबंधकतावच्छेदककोटौ निवेशेमानाभावादित्यस्फुरतास्य व्याप्यपर्यवसितोर्थ इति प्राहुः यत्र व्यभिचारसंशयो हेतौ वर्त्तते तत्रैतन्निरा
सार्थमनुकूलतर्कापेक्षायामपि सर्वत्रानुकूलतर्कस्य व्याप्तिग्रहहेतुत्वे मानाभावेन यद्यनुकूलतर्को नास्ति तदा तदभावेनैव व्याप्तेरग्रह इति मूलमनुपपन्नम
तआह सर्वत्रैवेति मूले पक्षोपाधिः पक्षोपाधित्वेनोपाधिज्ञानं दोष इति शेषः अस्तित्वनुकूलतर्केस्ति नोपाधिः नोपाधित्वं उभययथापि अनुकूलतर्कसत्वेत दस
त्वे च नोपाधिदूषणं नोपाधित्वेनोपाधिज्ञानं दूषणं उभयमुपाधिरनुकूलतर्काभावश्च उपाधिरपि उपाधित्वेनोपाधिज्ञानमपि व्याख्यामांतज्ञानस्य उपा राम॰
धिज्ञानस्य उपाधिपरं ज्ञानपरत्वाभावे-- पिनसतिरित्याशयेनाह उपाधेरिति मूले तस्यैव अनुकूलतर्काभावस्यैव एकारेणोपाधेर्व्यवच्छेदः आख्यायां त

स्यअनुकूलतर्काभावस्य साध्यसंबंधितावच्छेदकेतिसाध्याभावसामानाधिकरण्यविरुद्धसाध्यसामानाधिकरण्यावच्छेदकेत्यर्थः।उपजीव्यमिति।उपाधिनाज्ञा
पमानेनावच्छेदकीभूयसाध्यसामानाधिकरण्योपपादनादितिभावः।संबंधबोधे।सामानाधिकरण्यबोधे प्रवृत्तेरेकत्रैकपक्षत्वौ संबंध स्यसामानाधिकरण्यस्य
संबंधः।सामानाधिकरण्यबाध्यः।सामानाधिकरण्यसंबंधेनबाध्यः।आवश्यकः।उपाधेरात्मलाभार्थमित्यादि।उभयोरपिउपाध्यनुकूलतर्काभावयोरपि
व्याख्यानात्उपदर्शितार्थस्यमुपाधेर्दोषत्वं उपजीव्योपजीवकभावविरहेणेतिशेषः।उपजीव्यत्वाभिधानंअनुकूलतर्काभावेउपजीव्यत्वेनदोषत्वाभिधा भि
नं दीधितावश्यंभावमात्रेति मात्रपदेनोपदर्शितदोषत्वप्रयोजकावच्छेदः।तात्पर्यमिति आर्द्रेंधनाद्युपाधेः सामानाधिकरण्येनाननुपलपनीयत्वादितिभावः।व्याख्या
यां उपजीव्योपजीवकभावेतिकार्यकारणभावेत्यर्थः।अनुकूलतर्कसत्त्वदशायां धूमादौ सोपाधेरात्मलाभार्थमनुकूलतर्काभावस्योपजीव्यत्वमसंभवेदतआ ६
ह अनुकूलतर्केरीतेति संभवादिति उपाधेरात्मलाभार्थमनुकूलतर्काभावस्योपजीव्यत्वासंभवादितिशेषः।अविरुद्धत्वेनेति प्रमेयत्वादौ साध्यतदभावयो
ःसामानाधिकरण्यसत्त्वान्नतद्विरोधः।विरुद्धयोःसाध्यसामानाधिकरण्यतदभावयोरस्तुनैकत्रहेतौसत्त्वमित्याशयः।फलेपिहेतौसाध्याभावसामानाधिक
रण्यज्ञानात्मकफलेपि।दीधितौव्यापकभावस्थितिउपाध्यनुकूलतर्काभावयोःपरस्परंव्याप्यव्यापकभावस्थितिरित्यर्थः।उपजीव्योपजीवकभावरहस्यानुपपत्तेव्याख्या म
यांकदाचिदिति कार्यकारणभावग्रहादेरेवानुकूलतर्कतया तद्ग्रहे साध्याभावदशायां कदाचित्तद्ग्रहाभावसंभवादितिभावः।धूमवान्वह्नेरित्यादौवह्नित्यादिधूम

भा॰ प्र॰ व्यभिचारी स्यात्तत्राह दूषकं न स्यादिति साध्यसत्तर्कविषयीभूताया व्यतिरेकव्याप्त्यभावाद्यात्मकानुकूलतर्काभावस्य हेतावसत्त्वेनोपाधेरनुकूलतर्काभावव्या
प्यत्वासंभवादाह सत्तर्केति न सद्धेताविति वह्निमान् धूमादित्यादौ धूमोपाधिर्वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यादित्यादिसत्तर्कविषयीभूतापाद्यव्यतिरे
कव्यक्तिजन्यत्वाद्यभावात्मकानुकूलतर्काभावस्य धूमादावसंभवादिति भावः दीधितावकिंचित्कर इति दूषकतायामविनिगमक इत्यर्थः व्याख्यायानिर्णाय
कत्वादिति व्याप्यस्य धूमादेरनुपजीव्यत्वेन व्यापकस्य वह्न्यादेरुपजीव्यत्वेन च व्यापकस्योपजीव्यतया व्यापकस्यानुकूलतर्काभावस्योपजीव्यतया दोषत्व
संभवेनोपाधेरुपजीव्यतया दोषत्वाभिधानमसंगतमित्याशयः न चानुकूलतर्काभावस्यैवोपाधेरपि व्यापकतया विनिगमनाविरहादेवोपाधेर्दोषत्वं व्या
तरावश्यकत्वे विनिगमकाभावादित्यरुचिमिति वोध्यं तथा सत्युपजीव्योपजीवकभावो दूषकनस्यैव वैयर्थ्यापत्तेः वस्तुतस्तु दीधितौ अकिंचित्कर इति उपजीव्यता
या व्याप्यत्वव्यापकत्वयोरेकतरमात्ररूपत्वे मानाभावेन दूषकतायां विनिगमकत्वासंपादक इत्यर्थः ननु व्याप्यत्वेनैवोपजीव्यत्वमिति नियमरावमानं स्या
दत आह व्याख्यायां व्याप्यत्वेनैवेति उपजीव्यत्वस्य तन्नियमस्य निर्युक्तिकत्वादिति धूमव्याप्यस्य धूमसामग्र्यादेरिव धूमव्यापकस्य वह्न्यादेरपि धूमो
पजीव्यत्वादिति भावः पक्षान्तरे अकिंचित्करः प्रकृतानुपयुक्तः उपजीव्योपजीवकभावानात्मक इति पर्यवसितं ननु व्याप्यं च व्यापकं च व्याप्यव्यापके उपजीव्योपजी राम॰
वके तयोर्भाव इति रीत्या तदात्मकत्वं स्यादत आह व्याप्यत्वेनैवेति निर्युक्तिकत्वादिति [redacted] उक्तामिव्यापकमेवेति दि [redacted] विनिगमकत्वात् दूषकतायां विनिगक

मकत्वसंभवात् व्यापकस्योपाधेर्दूषकत्वं संभवतीति शेषः दीधितौ विशेषतस्त्विति मुरारिमिश्र इत्यर्थः तथा च ज्ञायमानदूषकतायां व्याप्यव्यापकभावस्तु तत्राह दूषकता
यामविनिगमकमक इति पर्यवसितं व्याख्यायां एकतरेति व्याप्यव्यापकयोरित्यादि एतत् पूर्वोक्तं ननु उपाधेर्ज्ञायमानदूषकतासंभवेप्यनुकूलतर्काभाव
स्य स्वरूपसतः दूषकतया न ज्ञायमानदूषकतासंभव इत्यत आह अनुकूलतर्काभावस्येति अनुमानविघटे इति तथा चानुमानस्य ज्ञायमानलिंगात्मकत
पातस्य न ज्ञायमानदूषकतात्वासंभव इति भावः दीधितावेकमिति उपाधिमज्ञात्वानुकूलतर्काभावस्येदस्येव तन्मज्ञात्वाप्युपाधिज्ञानादिस इत्यर्थः ज्ञानाच्चेति
च इत्यर्थः ज्ञाप्यज्ञापकभाव इति उपजीव्योपजीवकभाव इत्याप्यनुषज्जते उपाधिज्ञानेन उपाधिज्ञानेन उपाधित्वज्ञानस्य दोषत्वे न तथा च व्यभिचारित्वं पा
धेरवश्यं भावमात्रेपि दोषत्वे मानाभाव इति भावः व्याख्यायां व्यभिचारशंकेति अनुकूलतर्कस्येत्यादि दीधितावन्येति स्वव्यक्ष्यतावच्छेदकवाचक इत्यर्थः व्या
ख्यायां दूरमहानसान्यतरत्वे इति स्वरूपासिद्धिपरिहाराय दूरेति विशेष्यदलसार्थक्याय महानसेति महानसे व्यभिचारवारणाय विशेषणनिवेशः अत्रसंसं
तेदूरपदं जलत्वावच्छिन्नपरं तेन दूरदेशे रजस्य दृष्टांततया न दृष्टांतासिद्धिरिति महानसं त्वेस इत्यर्थः घटवित्तदूरदेसाध्यव्यावर्त्तकतादिति विशेषितो विशेषि
तसाधारणपक्षादृष्टा साध्यव्यावृत्तिस्तत्वं स्वेवलक्ष्यतावच्छेदकेनिवेशादिति भावः पक्षनिष्ठत्वस्य व्यावृत्तिविशेषणत्वे त्रयोगोलकं धूमव
द्वन्हेरित्यादावयोगोलकनिष्ठाया धूमादिव्यावृत्तेरहितत्वेन तदुक्तापिकाया वह्न्यादिव्यावृत्तिस्तत्वमतियोगिनि वह्न्यादावतिव्याप्तिरत स्तत् दितीयया

वृत्तिविशेषणतामित्यभिप्रेत्याहपक्षनिष्ठेतिऽन्नायकत्वस्योन्नयनफलोपधायकत्वरूपत्वेयथावृत्त्यानसाध्यव्याप्तस्योन्नयनंतत्राव्याप्तिरतआहउन्नाय
कत्वमितितदितिऽन्नयनेसमर्थःऽन्नयनयोग्यतायाव्याप्तिपक्षधर्मतारूपत्वेपिपक्षनिष्ठत्वेनपक्षधर्मतायालाभात्व्याप्तिरेवात्रोन्नयनयोग्यतेत्याशये
नाहव्याप्तेर्वाभिइतिअथैवमपिपर्वतोवह्निमान्धूमादित्यादौन्हदस्यनिष्ठायासाध्यव्याप्तेर्निरुक्तस्याऽक्तरूपेणोन्नायिकायापर्वतादिनिष्ठामहानसत्वादि
व्याप्तिस्तत्प्रतियोगित्वस्यमहानसत्वादेःसत्वादित्याशिताद्वस्यमितिचेदुन्नायकतावच्छेदकरूपेणापक्षवृत्तितायाविवक्षितोनोन्नायकतावच्छेद
कह्रदमहानसान्यतरत्वविशिष्टमहानसत्वाभावत्वेनमहानसत्वाभावस्यपक्षवृत्तित्वविरहेणानतिप्रसंगात्एवंचपक्षवृत्तितावच्छेदकंसत्साध्यव्याप्ति
उन्नायकतावच्छेदकंयद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वंतद्धर्मवत्त्वमुपाधिरितिपर्यवसितंमामान्यात्पक्षनिष्ठेतिपक्षनिष्ठायासाध्यव्याप्तेर्निरुक्तऽन्नायकव्याप्ते
त्तिप्रतियोगित्वमित्येवार्थःऽक्तातिव्याप्तिनारवस्थापत्तापक्षनिष्ठत्वमुन्नायकेनविशेषणंनचैवमप्ययोगोलकधूमवह्न्यादेरित्यादावुक्तरीत्याव्याप्यादेरुपाधिता
पत्तिरितिवाच्यंइष्टापत्तेःतथाचपक्षवृत्तितावच्छेदकसाध्याभाववत्त्वावच्छिन्नव्यापकतावच्छेदकंयद्धर्मावच्छिन्नप्रतियोगीकाभाववत्त्वंतद्धर्मवत्त्वमुपाधिरितिफलि
तार्थइत्याहुःतदपिव्याप्तिरितितत्रापकतावच्छेदकनिरुक्तरूपेणातद्भावस्यपक्षवृत्तित्वादितिभावःतच्चतेषामव्याप्यत्वान्नातिव्याप्तिरतआहतेषामितिनच
नसत्वमितिपक्षोन्नायकेसाधनव्यापकेतिव्याप्तिवारणायसाधनाव्यापकत्वंकथंनोपात्तमतआहदीधितौतत्त्वेतिसाधनाव्यापकत्वस्येतिशेषःनोपात्तमितितर

ध्यावच्छिन्नसाधनव्यापकस्य लक्ष्यत्वादेवनातिप्रसंग इति भावः आख्यायां एवं सत्यपि पक्षोक्तो व्यापकत्वस्य दूषकतावीजत्वे परंपरेति स्वाभाववनिवर्त्यसाध्यीय
तद्रूपपरंपरेत्यर्थः संबंधतोभावतेन संबंधेन साधनस्योपधिमत्त्वाभावः लक्ष्यता इति अत्र लक्षणशरीरे लक्ष्यतावच्छेदकरूपः एवमग्रेपि तत्प्रदेशं साध
नस्येत्यस्य प्रवेशं पद्यतीति एतत्कस्येत्यभिचारोन्नापकत्वमेव दूषकतावीजमिति भावः पूर्वलक्षणार्थेन पूर्वलक्ष्यतावच्छेदकार्थेन वस्तुतस्तु पदार्थानेनेत्यादि
नोपवर्णितार्थेन निःपादनः तदर्थपरतया वस्तुतस्त्वित्यादिनोपवर्णितार्थपरतया न कर्तव्यं पूर्वं न कर्तव्यं उपसंहारः स च धर्मेपि स्याभावात्मकत्वे साध्यसा
धनसंबंधाभाव इत्युपसंहारः द्वितीयेति यद्वितीयः शुद्धसाध्यव्यापकस्य लेएतत्प्रकारानुसरणावैयर्थ्यमत आह साधनावच्छिन्नेति तत्संबंधाभावस्य
साध्यसाधनसंबंधाभावस्य च अनंतिरिक्तत्वात् साध्याभाववत्साधनाभाववानतिरिक्तत्वमिति भावः मताश्रयणात् दीधितिनोपपक्षधर्मतावत्त्वादिति यत्के साध्या
